Digitized by eGangotri and Sarayu Trust.

तर्कसङ्ग्रहः

"बालबोधिनी" सहितः

नृसिंहदेव शास्त्री

महामहोपाध्याय पं० माधव भण्डारी शास्त्री

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

श्रीः

तर्कसङ्ग्रहः ।

भूतपूर्वलवपुरीय-प्राच्यमहाविद्यालय-दर्शनशास्त्राध्यापकेन
सारस्वतवंशावतंस-जैनन्याय-विशारद-कवितार्किक
नृसिंहदेवशास्त्रिणा दर्शनाचार्येण विरचितया
बालबोधिन्याख्यव्याख्यया तत्कृत-
विषमस्थलटिप्पण्या चसहितः ।

व्याकरण-वेदान्ताचार्य-साहित्य-मीमांसा-तीर्थ-लवपुरीय
प्राच्यमहाविद्यालय प्रधानाध्यापक महामहोपाध्याय
पण्डित भाण्डार्युपाव्ह माधवशास्त्रिभि-
र्विरचितया टिप्पण्या च सहितः
तैरेव च संशोधितः ।

प्रकाशकः

मेहरचन्द्र लक्ष्मणदास

संस्कृत हिन्दी पुस्तक विक्रेता

सैदमिट्ठा बाज़ार, लाहौर

पञ्चमं संस्करणम् [...]] [मूल्यं ।=)

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

प्रकाशक—

लाला तुलसीराम जैन, मैनेजिंग प्रोप्राइटर, मेहरचंद्र लछमणदास, संस्कृत हिंदी पुस्तक विक्रेता, सैदमिट्ठा बाज़ार, लाहौर।

Acc: no: 12433.

Rs 0-6-0

All Rights reserved by the publishers.

मुद्रक—

लाला ख़ज़ानचीराम जैन, मैनेजर, मनोहर इलैक्ट्रिक प्रेस, सैदमिट्ठा बाज़ार, लाहौर।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

श्रीः

भूमिका ।

विदितमेवेदं विपश्चिताम्—यथा पाणिनिमुनिप्रणीतसूत्रीयतत्त्वजिज्ञासूनां छात्राणां कृते भट्टोजिदीक्षितैः सिद्धान्तकौमुदी व्यरचि, तत्रापि बहुभारमाकलय्य अल्पमतिजनप्रवेशसौकर्याय लघुसिद्धान्तकौमुद्यपि प्रस्तुता वर्त्तते, तद्वत् गोतमकणादमुनिप्रणीतन्यायवैशेषिकशास्त्रमर्मज्ञानसौकर्याय प्रवेशिकास्थानीयोयं "तर्कसङ्ग्रह" नामको ग्रन्थोऽन्नम्भट्टैर्विरचितः। अयं ग्रन्थोऽत्यल्पाक्षरः पूर्णविषयः तत्त्वनिरूपणपरः सर्वथैव बहूपकरोति विद्यार्थिनामिति नाविज्ञातं मनीषिणाम् । अस्योपरि टीका अपि अनेकाः सन्ति, परं साम्प्रतिकानां मतिमान्द्याद्वा न्यायशास्त्रप्रचारविशेषाभावाद्वा प्रथमत एव दुरवगाहावच्छेदकावच्छिन्नादिकठिनपरिभाषादिसमन्वितत्वाद्वा न्यायशास्त्रे प्रवेशमिच्छतां छात्राणां कृते काठिन्यमेवावहन्तीति मत्वा मयाऽतिसरलाऽल्पपाठा तत्तत्प्रश्नकरणप्रकारसमन्विता "बालबोधिनी" नाम्नी टीका विरचिता । एतस्या आश्रयेण तर्कसङ्ग्रहं पठतां छात्राणां प्राज्ञादिपरीक्षोत्तरणमनायासेन सेत्स्यति । अथच विशारदादिपरीक्षादित्सवो मुक्तावल्यादिग्रन्थेषु सुखेन प्रवेशं लप्स्यन्त इति स्वयमनुभवेन भवन्तो ज्ञास्यन्ति ।

अस्य ग्रन्थस्य रचयिता श्रीमान् "अन्नम्भट्टः" सुधीः आन्ध्रदेशीयः कृष्णानद्याः समीपवर्त्तिनि भूमण्डले जन्म लेभे । सम्प्रत्यपि कृष्णातीरोपान्तवर्त्तिनि केशवपुराभिधे ग्रामे अन्नम्भट्टाभिजना विद्वांसः प्रसिद्धा द्विजन्मानः सन्तीति श्रूयते । अस्य

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

पितुर्नाम "तिरुमलाचार्य" इत्यासीत् । अस्याग्रजो "रामकृष्णभट्टः" येन सिद्धान्तकौमुद्याः सिद्धान्तरत्नाकरं नाम व्याख्यानं कृतम्, यदुपजीविनो नागेशभट्टाद्या अभूवन्निति श्रृणुमः । अयं मल्लिनाथात् परकालीनः भट्टोजिदीक्षितात् पूर्वकालीन आसीदिति बहूनां विश्वासः । अन्नम्भट्टप्रणीता ग्रन्थाः—तर्कसङ्ग्रहः, तर्कसङ्ग्रहदीपिका, तर्कभाषातत्त्वबोधिनी टीका, तत्त्वचिन्तामण्यालोकसिद्धाञ्जनम्, भाष्यप्रदीपोद्योतनं नाम कैयटव्याख्यानम्, मिताक्षरा नाम पाणिनिसूत्रवृत्तिः, राणकोज्जीविनी ब्रह्मसूत्रवृत्तिश्चेति सन्ति । अधिकं मयैतद्विषये ग्रन्थगौरवभयात् सम्प्रति नात्र न्यस्यते । अहमाशासे एतस्याष्टीकायाः प्रचारेणात्र देशे न्यायशास्त्रं पुनरुज्जीवयन्तो विद्वांसो मम यत्नं सफलयिष्यन्तीति प्रार्थयिता—

ता० २८-३-२४ ई०

विदुषामनुचरः—

नृसिंहदेवः ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

तर्कसंग्रहस्य पञ्चमं संस्करणम् ।

अयं हि तर्कसङ्ग्रहो न्यायशास्त्रं प्रविविक्षूणां कृतेऽत्यन्तसरलतया संक्षिप्ततया च सकलसिद्धान्तोपन्यासमुखेन परममुपकारमादधातीति तस्य सार्वत्रिकप्रचारादेवावगम्यते । एतद्ग्रन्थकर्तुः श्रीमतोऽन्नंभट्टस्य विषये किंचिदितिवृत्तं श्रीमद्भिः कवितार्किक नृसिंहदेव शास्त्रिभिः स्वीयभूमिकायां यत्समुल्लिखितं तत्तथैवाभ्युपगमनार्हम् । श्रीम नृसिंहदेव शास्त्रिभिर्या 'बालबोधिनी' नाम तर्कसङ्ग्रह टीका प्रणीता सा वस्तुतः सरला लक्षणोदाहरणविशदीकरणे परमं सौकर्यमादधाना बालानां परमोपकारिणीति सैव संमुद्राप्य विद्वत्सेवायां समुपस्थापिता, तदीयविषमस्थल टिप्पणी तथा हिन्दी भाषाऽनुवादश्च विशेषतः छात्राणामुपकारावहा विति तावपि तथैवावस्थापितौ ।

आवश्यकस्थलेषु प्रकाशकानुरोधान्मयाऽपि टिप्पणी विरचिता । अस्यां हि टिप्पण्यां तर्कसङ्ग्रहनाम्नः सार्थक्यप्रदर्शनं, तत्तदुपन्यस्तपदार्थानां गौतमकणादसूत्रमूलकत्वप्रदर्शनं, वाय्वाकाशसंख्यादीनां श्रुति मूलकत्व विवेचनं, अद्वैत वेदान्त न्यायमतयोरापाततः प्रतीयमानभेदनिवारणं, तत्तदभावादीनां व्यावहारिकानुभवमुखेनोपन्यसनादिकं च विदुषां मनो विनोदाय स्यादित्युपन्यस्तम् । एतत्संशोधनकार्यमपि यथा संभवं मया कृतम् । अनेन च कार्येण भगवान् सर्वान्तर्यामी प्रीतः सन् सर्वान्नः प्रीणयत्वित्याशास्ते ।

ता० ३१-५-३८
ज्येष्ठ शुक्ल द्वितीयायाम्
सं० १९९५.

महामहोपाध्यायो
माधव शास्त्री भाण्डारी
लवपुरीय प्राच्यमहाविद्यालय
प्रधानाध्यापकः ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

श्रीः

"बालबोधिनी" टीकोपेतस्य तर्कसङ्ग्रहस्य

विषयानुक्रमणी ।

विषयः	पृष्ठम्	विषयः	पृष्ठम्
मङ्गलम्	१	विशेषपदार्थः	१०
टीकाकारमङ्गलम्	,,	समवायलक्षणम्	,,
न्यायशास्त्रस्य प्रवृत्तिः	४	अभावविभागः	११
लक्षणस्य लक्षणम्	,,	पृथिवी	,,
अव्याप्त्यादीनि	,,	परमाणुलक्षणम्	१२
मङ्गलस्य लक्षणं भेदाश्च	,,	आपः (जलम्)	१३
अनुबन्धचतुष्टयम्	५	तेजः	१४
सप्तपदार्थाः	,,	वायुः	१६
पदार्थलक्षणम्	६	प्राणादीनां लक्षणम्	,,
'शक्ति' पदार्थस्य-अभावेऽन्तर्भावः	,,	आकाशम्	१७
द्रव्यविभागः	७	विशेषगुणाः	,,
द्रव्यलक्षणम्	,,	कालः	,,
अन्धकारविषये मीमांसकमतखण्डनम्	,,	अतीतादिकाललक्षणम्	,,
गुणाः	८	दिक्	१८
गुणलक्षणम्	,,	आत्मा	,,
कर्माणि	,,	मनः	१९
कर्मलक्षणम्	८	रूपनिरूपणम्	,,
सामान्यनिरूपणम्	९	रसः	२०

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

विषयः	पृष्ठम्
स्पर्शः	२१
पाकप्रक्रिया	२२
संख्या	२३
परिमाणम्	२४
पृथक्त्वम्	,,
संयोगः	,,
विभागः	,,
परत्वापरत्वे	२५
गुरुत्वम्	,,
द्रवत्वम्	२६
स्नेहः	,,
शब्दः	,,
बुद्धिः	२७
अनुभवभेदाः	२८
करणलक्षणम्	३१
कारणलक्षणम्	,,
कार्यलक्षणम्	,,
कारणभेदाः सलक्षणाः-सोदाहरणाः	३२
अथ प्रत्यक्षनिरूपणम्	३३
प्रत्यक्षभेदाः (सविकल्पकाद्याः)	३४
इन्द्रियार्थसन्निकर्षः	३५
अनुमानलक्षणम्	३७
परामर्शः	,,
व्याप्तिः	३८
पक्षधर्मता	

विषयः	पृष्ठम्
अनुमानभेदाः	३६
स्वार्थानुमानप्रकारः	,,
स्वार्थानुमानलक्षणम्	,,
'लिङ्ग' निर्वचनम्	४०
परार्थानुमानप्रकारः	,,
परार्थानुमानलक्षणम्	४१
पञ्चावयवाः	,,
प्रतिज्ञादीनां प्रयोजनम्	४२
अनुमितिकरणे मतभेदः	४३
त्रिविधलिङ्गम्	,,
धूमहेतौ द्विधा व्याप्तिः	४४
केवलान्वयि	४४
केवलव्यतिरेकि	,,
पक्षलक्षणम्	४६
सपक्षलक्षणम्	,,
विपक्षलक्षणम्	,,
हेत्वाभासाः	४७
हेत्वाभाससामान्यलक्षणम्	,,
सव्यभिचारः	४८
विरुद्धः	४६
असिद्धः	५०
उपाधिप्रपञ्चः	५१
उपाधौ भट्टकारिका	५३
बाधितः	,,
अनुमानप्रकरणसारः	५४
अथोपमानम्	,,

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

विषयः	पृष्ठम्	विषयः	पृष्ठम्
अथ शब्दः	५६	धर्मः	,,
आप्त-वाक्य-पद-लक्षणानि	,,	अधर्मः	,,
शाब्दबोधलक्षणम्	५७	संस्कारप्रपञ्चः	६२
वृत्तिलक्षणम्	,,	कर्मप्रपञ्चः	,,
शक्तिर्लक्षणा च	,,	सामान्यलक्षणम्	६३
आकाङ्क्षादिनिरूपणम्	५८	विशेषलक्षणम्	,,
वाक्यप्रपञ्चः	५९	समवायलक्षणम्	,,
अयथार्थानुभवप्रपञ्चः	६०	अभावपदार्थ-प्रपञ्चः	६४
सुखम्	६१	तादात्म्यसम्बन्धस्याव-च्छेदकत्वनिरूपणम्	६५
दुःखम्	,,	सप्तषोडशपदार्थवादे-एकवाक्यता	,,
इच्छा	,,	पदार्थज्ञानस्य परं प्रयोजनम्	६६
द्वेषः	,,		
प्रयत्नः	,,		

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

॥ श्रीगणेशायनमः ॥

तर्कसङ्ग्रहः ।

बालबोधिनीटीकोपेतः

निधाय हृदि विश्वेशं विधाय गुरुवन्दनम् ।
बालानां सुखबोधाय क्रियते तर्कसङ्ग्रहः ॥१॥

[बालबोधिनी]

यच्चिन्तनेन निखिलं दुरितं विनाशं
सद्यः प्रयाति तमहं हृदि भावयामि
श्रीशैलराजदुहितुस्तनयं धुनानं
दानागतभ्रमरभूषितगण्डपालिम् ॥ १ ॥
शिवं साम्बं नमस्कृत्य मातरं पितरन्तथा ।
तर्कसङ्ग्रहटीकेयं रच्यते बालबोधिनी ॥२॥

तर्कसङ्ग्रह इति—अयमत्राभिप्रायः नैय्यायिकैर्गौतममहर्षिप्रभृतिभिः "प्रमाण, प्रमेय, संशय, प्रयोजन, दृष्टान्त, सिद्धान्त, अवयव, तर्क, निर्णय, वाद, जल्प, वितण्डा, हेत्वाभास, छल, जाति, निग्रह-स्थानानां तत्त्वज्ञानान्निश्रेयसाधिगमः" (गौतमसूत्रं १) इत्येवं रूपेण प्रमाण प्रमेयादि षोडश पदार्थानां तत्त्वज्ञानान्निः श्रेयसस्य प्राप्तिरुक्ता । एवं वैशेषिकशास्त्रप्रवर्तकैः कणाद-महर्षिभिरपि "धर्मविशेषप्रसूताद् द्रव्यगुणकर्मसामान्यविशेषसमवायानां पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञाना न्निःश्रेयसम्" । (वैशेषिक सूत्र प्रथमाध्याय प्रथमाह्निकस्य सूत्रम् ४) अनेन सूत्रेण द्रव्यगुणादीनां षण्णां पदार्थानां साधर्म्यवैधर्म्यानुसन्धानपूर्वकतत्त्वज्ञानान्निः श्रेयसमित्युक्तम् । एवमुभयोरपि न्याय वैशेषिकशास्त्रयोः निःश्रेयसोपयोगिपदार्थतत्त्वावधारणार्थं प्रवृत्तत्वेऽपि

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

नैय्यायिकगौतमाचार्योक्ताः प्रमाणप्रमेयादयः षोडश पदार्थाः सामान्यतया लोक-प्रसिद्धत्वात्ते तर्कसाध्या न भवन्ति । तर्कमन्तरेणापि तेषां लोके प्रसिद्धत्वात् । कणादोक्तास्तु द्रव्यगुणादयः पदार्थाः प्रायशस्तर्काधीनाः । सहेतुककल्पनाविशेषेणैव प्रायशस्तेषां सिद्धिशालित्वात् । तथाहि पृथिवीजलतेजसां प्रत्यक्षत्वेन लोकव्यवहार सिद्धत्वेऽपि वायु, आकाश, काल, दिक्, आत्म मनोरूपाणां द्रव्याणा मनुमानविशेषेणैव साधनं क्रियते। एवं च नवसु द्रव्येषु त्रयाणां प्रत्यक्ष सिद्धत्वेऽपि, षण्णां द्रव्याणां तर्कसाध्यत्वमेव ।

तथा गुणेष्वपि "रूपरसगन्धस्पर्शाः,सङ्ख्याः,परिमाणानि, पृथक्त्वं, संयोग विभागौ, परत्वापरत्वे, बुद्धयः, सुखदुःखे, इच्छाद्वेषौ, प्रयत्नाश्च,गुणाः" (वै० सू० अ० १ आ० १ सू० ६) इति सूत्रेण सप्तदश सङ्ख्याका गुणा उक्ताः । तत्र रूपरसगन्ध स्पर्शानां प्रत्यक्षत्वेऽप्यपरे प्रायशो गुणास्तर्कसाध्याः, बहिरिन्द्रियैरविषयीकृता इति तेषामपि तर्कसाध्यत्वं स्पष्टमेव । एवं चशब्देन सङ्गृहीताः सप्तगुणाः सूत्रकृता स्पष्टमनुक्ताअपि, प्रशस्तपादाचार्यैः 'च' शब्देनोहिता एव। अतएव प्रशस्तपादभाष्ये "चशब्दसमुचिताश्च गुरुत्वद्रवत्वस्नेहसंस्काराऽदृष्टशब्दाः सप्तैवेत्येवं चतुर्विंशतिर्गुणाः" इत्युक्तम् ।

तथोत्क्षेपणादीनि कर्माण्यप्युत्तरदेशसंयोगादिभिर्हेतुभिरनुमीयन्ते इति तेषामपि तर्कसाध्यत्वमेव । अतएव प्राभाकराः कर्मणां प्रत्यक्षत्वं नैवाङ्गीकुर्वन्ति । अपरेषां मते कर्मणः प्रत्यक्षत्वसम्भवेऽपि प्राधान्येन तर्कावगम्यता निराबाधैव ।

तदेवं सत्ताश्रयत्वाद्द्रव्यगुणकर्मरूपाः पदार्था मुख्याः । तेषुच प्राधान्येन तर्कगम्यत्वमुक्तम् । सामान्य विशेष समवायास्तु सत्तानाश्रयत्वादमुख्या एव ।

किञ्चात्मरूपद्रव्ये तदतिरिक्तानामष्टानां द्रव्याणां गुणकर्मणां च साधर्म्यवैधर्म्ये ज्ञातव्ये, तथा आत्मातिरिक्त द्रव्याणां गुणकर्मणां च परस्परं साधर्म्यवैधर्म्ये अपि ज्ञातव्ये इति हि अभिप्रेतं शास्त्रकृतां, तेनैव निःश्रेयससिद्धेः । तत्र साधर्म्यज्ञानमनुवृत्तबुद्धिगम्यं वैधर्म्यज्ञानं च व्यावृत्तबुद्धिगम्यमिति नियमादनुवृत्तबुद्धिनियामकः सामान्यपदार्थः, व्यावृत्तबुद्धिनियामकश्च विशेषपदार्थः, । इतीमौ सामान्यविशेषौ बुद्धिविशेषाधीन सिद्धिकाविति तर्कगम्याविव ।

तथा समवायोऽपि तर्कैकगम्य एव । तथाहि गुणगुणिनोः, क्रिया क्रियावतो, र्जातिव्यक्त्योः, रवयवावयविनोश्च पृथग्भूतयोरवस्थानं (विनाभूतयोरवस्थानं) न दृश्यते । किन्तु यद्यवस्थानं दृश्यते तर्हि मिलितयोरेव । तथा च योऽयमपृथग्भूतयोर्गुणगुणिनोः सम्बन्धः [illegible] कुण्डयोः सम्ब-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

चिकीर्षितस्य तर्कसङ्ग्रहग्रन्थस्य विघ्नविध्वंसपूर्वकसमाप्तिकामोऽन्नम्भट्टनामा सुधीः आदौ शिष्यान् * शिक्षयितुं नमस्कारात्मकं मङ्गलमातनोति—निधायेति। विश्वेशम्=जगत्कर्त्तारं † शिवं=परमात्मानम्, हृदि=मनसि, निधाय=नितरां ध्यात्वा सर्वदा तद्ध्यानपरो भूत्वा, गुरुवन्दनम्=विद्यागुरुनमस्कारं विधाय=कृत्वा, बालानाम्=यैः व्याकरणादिशास्त्रं पठितं न्यायशास्त्रं तु न ज्ञातं तेषां न्यायशास्त्रपदार्थजिज्ञासूनां, ‡ सुखबोधाय=सुखेन अनायासेन बोधाय पदार्थतत्त्वज्ञानाय (मया अन्नम्भट्टेन) तर्कसङ्ग्रहः=एतन्नामा ग्रन्थः क्रियते=रच्यते इत्यर्थः।

तर्क्यन्ते § यथार्थज्ञानविषयीक्रियन्ते इति "तर्का" द्रव्यादिसप्तपदार्थाः तेषां 'सङ्ग्रहः' सङ्क्षेपेण उद्देशलक्षणपरीक्षा यस्मिन् सः ‖ "तर्कसङ्ग्रह" इति अन्वर्थेयमस्य ग्रन्थस्य सञ्ज्ञा। अर्थात् उक्ता व्युत्पत्तिरेवोक्तग्रन्थस्य नामकरणे बीजम्। इदमत्रावश्यं पठद्भिः पाठयद्भिश्च ज्ञातव्यम्—

---

* स्वकर्त्तव्यत्वेन ज्ञापनं **शिक्षा**॥ ग्रन्थारम्भेऽस्मत्कृतं मङ्गलं दृष्ट्वा अस्मच्छिष्या अप्येवं कुर्युरित्याकारकोऽभिप्रायः प्रकृते 'शिक्षा इति तात्पर्यम्।

† "शिवं शान्तमद्वैतं चतुर्थं मन्यन्ते स आत्मा" इति (माण्डूक्य० ७) श्रुतेः।

‡ सुखं दुःखध्वंसो मोक्ष इति यावत्। सुखाय बोधः सुखबोधः। प्रयोजकत्वं चतुर्थ्यर्थः, तथा च (सुख) मोक्षप्रयोजकं ज्ञानमिति फलितमिति **निरुक्तिकारः**

§ यत्तु—वस्तुतोऽस्य ग्रन्थस्य "अर्थसङ्ग्रह" इति नामोचितमिति कश्चिदाह। तन्न, चन्द्रोदय—न्यायबोधिनी—दीपिका—वाक्यवृत्ति—पट्टाभिरामी—निरुक्ति—नीलकण्ठी—प्रभृत्यनेकग्रन्थविरोधात्। तर्कसङ्ग्रहनामकरणेन ज्ञेयत्वरूपपदार्थसामान्यलक्षणबुबोधयिषापि ग्रन्थकारस्य शान्ता भवति, व्याख्यानञ्च सर्वाविशेषप्रतिपत्तिमवगमयतीति दिक्।

‖ तर्कसङ्ग्रहकृतप्रमाणजन्यप्रमितिविषयीक्रियन्त इत्यर्थः। एतेन ज्ञेयत्वं पदार्थसामान्यलक्षणमित्यपि निष्कृष्टं वेदितव्यम्।

न्धापेक्षया विलक्षण एव भवितुमर्हति। संयोगस्य हि आश्रय भूतं द्रव्यद्वयं संयोगात्प्राक् पृथग्भूतमपि दृष्टम्, अत एव तत्र संयोगो जन्यः, सच स्वाश्रयद्रव्याधीनोत्पत्तिकः, अत एव यद्द्रव्याधीनोत्पत्तिकः संयोगः स तदाश्रितत्वेन तत्तद्द्रव्यगुणत्वं भजते। समवायस्याश्रयभूतं पदार्थद्वयं तु न कदापि पृथग्भूतं दृष्टम्, अतएव समवायो न जन्यः, किन्तु नित्य इति भेदः।

तदेवमेषां पदार्थानां तर्क्यन्त इति तर्का इत्यन्वर्थकं नाम सिद्धम्। सङ्गृह्य तद् बोधकत्वाच्च ग्रन्थस्यापि तर्कसङ्ग्रह इत्यन्वर्थकं नाम सिद्धम्।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अस्य न्यायशास्त्रस्य * त्रिधा प्रवृत्तिर्भवति—उद्देशो लक्षणं परीक्षा चेति । तत्र नाममात्रेण वस्तुकथनमुद्देशः । यथा "द्रव्यगुण" इत्यादि । असाधारणधर्मो लक्षणम् । अर्थाद् यत्र अव्याप्तिः अतिव्याप्तिः, असम्भवश्च एतेषु अन्यतमोऽपि दोषो न भवेत् तदेव "लक्षण" मित्युच्यते । तत्र अव्याप्तिर्नाम—लक्ष्यैकदेश एव लक्षणघटनं नतु सर्वदेशे । यथा केनचित् पृष्टे "गोः किं लक्षण" मिति । तदोत्तरदाता यद्येवं वदेत् "कपिलत्वं गोत्वम्, अथवा "कृष्णत्वं गोत्वम्" तदिदं लक्षणं न युक्तम्, यस्मादत्र अव्याप्तिर्दोषः । अर्थात् कपिलायामेव गवि कपिलत्वं कृष्णायामेव कृष्णत्वं वर्त्तते नतु सर्वासु गोव्यक्तिषु । लक्ष्यञ्चास्माकं गोमात्रमेव तस्माद्गोमात्रस्यैकदेशे अवृत्तित्वादुक्ते लक्षणेऽव्याप्तिः प्रथमो दोषः । अतिव्याप्तिर्नाम—सर्वत्र लक्ष्ये घटितं सत् लक्षणं यदि अलक्ष्येपि गच्छेत् सा । यथा 'शृङ्गित्वं गोत्वम्" इति गोर्लक्षणं कृतं चेत्, तदा अतिव्याप्तिर्दोषः । कुतः ? सर्वासु गोव्यक्तिषु शृङ्गं विद्यते परन्त्वलक्ष्यभूतासु अजामहिष्यादिव्यक्तिष्वपि तदस्ति । तस्मादलक्ष्येऽपि गतत्वाद् अतिव्याप्तिरियं लक्षणदोषो द्वितीयः ।

असम्भवो नाम—यत् क्रियमाणं लक्षणं लक्ष्यमात्रे कुत्रापि न वर्त्तेत, यथा-"एकशफत्वं गोत्वम्" इति गोर्लक्षणं कृतं तदा गोमात्रे कुत्रापीदं न घटते, तत्र शफद्वयस्य विद्यमानत्वात्, तस्मादयमसम्भवो दोषस्तृतीयः । एतद्दोषत्रयरहितं यत्, स एवासाधारणो धर्मः, तदेव लक्षणम् । एवम्—"असाधारणधर्मो लक्षणम्" इति निष्पन्नम् । एतत्सर्वमग्रे मूले तत्र तत्र स्फुटीभविष्यति । यथा-"गन्धवती पृथिवी" इत्यादि । लक्षितस्य लक्षणं भवति नवेति विचारः परीक्षा । उद्देशस्य पक्षज्ञानं फलम्, लक्षणस्य इतरभेदज्ञानम्, परीक्षाया लक्षणदोष परिहारः अफलम् ।

इदन्तु बोध्यम्—यद्यपि विभागोऽपि एका चतुर्थी विधा भवितुमर्हति, अपेक्षिता च सास्मिन् शास्त्रे, तथापि पदार्थमात्राऽभिधानेनोद्देशलक्षणस्य विभागेऽपि सत्त्वात् न सा विधा पृथग्गण्यते । विभागकरणञ्च प्रमाणान्तरसत्त्वशङ्कानिवृत्त्यर्थम् । लक्षणेन इतरव्यावृत्तिबोधनेऽपि प्रमाणान्तराभावबोधनस्याशक्यत्वात् ।

किञ्च—त्रिविधं मङ्गलम् । आशीर्वादः, नमस्कारः, वस्तुनिर्देशश्च । ग्रन्थादौ मङ्गलमवश्यं कर्त्तव्यमिति शिष्टाचारः । एतस्य फलन्तु—प्राचां नैय्यायिकानां मते निर्विघ्नग्रन्थसमाप्तिः । नवीनानां मते विघ्नध्वंस एव । मङ्गललक्षणन्तु-समाप्तिप्रतिबन्धकपापविशेषध्वंसकारणत्वं मङ्गलत्वम् † इति ।

* इदञ्च "त्रिविधा चास्य शास्त्रस्य प्रवृत्ति" रित्यादिन्यायवात्स्यायनभाष्यमूलकम् ।

† ननु—प्रशस्ताचरणं नित्यमप्रशस्तविवर्जनम् ।
एतद्धि मङ्गलं प्रोक्त मृषिभिस्तत्त्वदर्शिभिः ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अस्य ग्रन्थस्य द्रव्यादिसप्तपदार्था विषयः, पदार्थतत्त्वज्ञानं प्रयोजनम्, पदार्थतत्त्वजिज्ञासुरधिकारी, विषयग्रन्थयोः * प्रतिपाद्यप्रतिपादकभावः सम्बन्धः,अधिकारिग्रन्थयोश्च बोध्यबोधकभाव इत्यादि ज्ञेयम्। इदमेव"अनुबन्ध-चतुष्टय" मित्युच्यते। यस्य ग्रन्थस्यादावनुबन्धचतुष्टयं न सिद्धयेत् तत्र विदुषां प्रवृत्ति र्न भवति। उक्तञ्च—

सिद्धार्थं सिद्धसम्बन्धं श्रोतुं श्रोता प्रवर्त्तते।
शास्त्रादौ तेन वक्तव्यः सम्बन्धः सप्रयोजनः॥ इति॥

(प्रश्नाः)—'तर्कसङ्ग्रह' इति नामकरणे किं बीजम्? कतिविधा न्यायशास्त्रस्य प्रवृत्तिः? लक्षणस्य किं लक्षणम्? लक्षणे के दोषाः? अव्याप्त्यादीनां लक्षण दर्शयित्वा उदाहरणेन स्पष्टीकुरु। मङ्गलस्य किं लक्षणं, कतिविधं च तत? तत्र नवीनप्राचीनमते फलं दर्शय। अस्य शास्त्रस्यानुबन्धचतुष्टयं लिख।

द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाः सप्त † पदार्थाः।

इत्येव वस्तुतो मङ्गललक्षणमिति चेद् भ्रान्तोऽसि शास्त्रचर्चानभिज्ञानात्, अविगीतशिष्टाचारविषयत्वेन प्रशस्ताचरणान्तःपातित्वादुक्तलक्षणकमङ्गलस्या-नभिनवोक्तेश्च। प्रशस्ताचरणतात्वावच्छेदेन तत्तत्कार्यसमाप्तिप्रतिबन्धकपापत्वाव-च्छिन्नप्रतियोगिताकध्वंसकारणतायास्तथाप्यनिवार्यत्वात्।

* स्वनिष्ठप्रतिपाद्यतानिरूपकप्रतिपादकतासम्बन्धेन पदार्था ग्रन्थे तिष्ठन्ति, ग्रन्थश्च स्वनिष्ठप्रतिपादकतानिरूपितप्रतिपाद्यतासम्बन्धेन द्रव्यादिषु तिष्ठतीत्यर्थः।

† "सर्वं वाक्यं सावधारणम्" इति न्यायेन "सप्तैव पदार्था" इत्यर्थः। तथा च—एवकारेणाधिकसङ्ख्याव्यवच्छेदः। विशेष्य-विशेषण-क्रियागतैवकारस्य क्रमेण अन्ययोगायोगात्यन्तायोगव्यवच्छेदबोधकत्वम्। पार्थ एव धनुर्धरः, शङ्खः पाण्डुर एव, नीलं सरोजं भवत्येव" इति क्रमेणोदाहरणानि। यथा प्रथमोदाहरणे पार्थादन्यस्मिन् धनुर्धरत्वव्यवच्छेदो बुध्यते, तथेहापि सप्तातिरिक्ते पदार्थत्वव्यव-च्छेदबोध इति "**मुकुन्दभट्टीय**"ग्रन्थानुसार्याशयः। कणादतन्त्रानुसारिणस्तु—

द्रव्यं गुणस्तथा कर्म जातिश्चैतत्त्रयाश्रया।
विशेषः समवायश्च पदार्थाः षडिमे मताः॥ इत्याहुः।

द्रव्यगुणेति—सप्तपदार्था इति—यद्यपि "धर्मविशेषप्रसूताद् द्रव्यगुण-कर्मसामान्यविशेषसमवायानां पदार्थानां साधर्म्य वैधर्म्याभ्यां तत्त्वज्ञानान्निः-श्रेयसम्" (सू० ४) इति वैशेषिक सूत्रे षण्णामेव भावपदार्थानामुल्लेखः। अभावस्तु भावरूपप्रतियोगिनिरूपणाधीननिरूपणत्वात्प्रधानेषु षट्सु भावेषु निरू-पितेष्वप्रधानीभूतोऽभावोऽप्यर्थात्सङ्गृहीत एवेति न पृथक्सूत्रितः। कणादम-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

पदार्थान् विभजते–द्रव्येति "सप्त" इति कथनेन न न्यूना नाप्यधिकाः पदार्थाः सन्तीति बोधितम् । पदस्य अर्थः=अभिधेयः "पदार्थ" इति व्युत्पत्त्या "अभिधेयत्वं पदार्थसामान्यलक्षणम्" । "* पदवृत्तिविषयत्वं पदार्थत्वम्" इति तु परमार्थः । शक्तिर्लक्षणा वेति पदवृत्तिरित्यग्रे शब्दखण्डे व्याख्यास्यामः । सर्वोऽयं चराचरात्मकः प्रपञ्चः सप्तभिः पदार्थैः सङ्कलित इति तार्किकाणां मतम् । अत्र मीमांसका आहुः—यदा जाज्वल्यमानस्य वह्नेः समीपं प्रतिबन्धकमणिरानीयेत तदा दाहो न भवति । यदा तत्र तस्यैव मणेरभावो भवति तदा दाहो जायते, तेन वह्निनिष्ठा दाहकारिणी शक्तिरस्तीति† त्यनुमीयते, सा चातिरिक्तः पदार्थ इति सप्तपदार्थकथनं न युक्तमिति । तन्न युक्तम्—प्रतिबन्धकमणेरभावेनैव दाहो जायते अर्थात् मणिसामान्याभावो दाहम्प्रति कारणं, तस्मात् शक्तिर्नातिरिक्तः कश्चित्पदार्थः किन्तु सप्तैव पदार्था इति नैय्यायिकानां सिद्धान्तः ।

---

* पदनिष्ठवृत्तिप्रयोज्यपदजन्यप्रतीतिविषयत्वं पदार्थत्वमिति परमार्थार्थः ॥ प्रतीतिश्च शाब्दबोधस्वरूपेत्याद्यन्यत्र विस्तरः ।

† अनुमानप्रकारश्च—"वह्निर्मणिनाश्यदाहानुकूलशक्तिमान् (प्रतिबन्धक) मणिसमवधाने दाहाजनकत्वात् यन्नैवं तन्नैवं व्यतिरेके यथा घट" इत्यादि । यद्यपि आद्यक्षणीयद्रव्यस्य निर्गुणत्वा त्तत्राव्याप्तमिदं लक्षणं तथापि गुणसमानाधिकरणसत्ताभिन्नजातिमत्त्वं तदिति विवक्षायां दोषाभावः ।

दर्षे रभावोऽपि पदार्थान्तरतयाऽभिप्रेत एव । अतएव (अ० १ आ० २ ये) "कारणाभावात्कार्याभावः" इति सूत्रे तथा नवमाध्याये "क्रियागुणव्यपदेशाभावात्" इति सूत्रे चाभावपदार्थः स्पष्टमेव महर्षिणोल्लिखितः सङ्गच्छते । एतेनोपरिनिर्दिष्टचतुर्थसूत्रे कणादमहर्षिणा भावस्यानुल्लेखात्कणादमहर्षिमतेऽप्यभावस्याधिकरणात्मकत्वं, कालविशेषात्मकत्वं, ज्ञानविशेषात्मकत्वं वा सिद्ध्यतीत्यपास्तम् । पदनिष्ठशक्तिनिरूपकत्वरूपपदार्थत्वस्याभावेऽपि सत्त्वेन तत्र पदार्थशब्दवाच्यत्वमपि निष्प्रत्यूहमेव ।

सप्त पदार्था इति–शक्ति शक्तिमतोरभेदाच्छक्तिरतिरिक्तः पदार्थो नास्ति । एवं सादृश्य मपि नातिरिक्तः पदार्थः किन्तु तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वरूपसादृश्यस्य सखण्डपदार्थत्वमेव । तच्च खण्डद्वयं तद्भेदः, तद्गतधर्म सम्बन्धश्च । तथा च सप्तैव पदार्था इति सिद्धम् ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

तत्र द्रव्याणि पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि नवैव*

द्रव्याणि † विभजते—पृथिवीति। पृथिवी, आपः (जलम्), तेजः, वायुः, आकाशः, कालः, दिक् (दिशा), आत्मा, मनः इति नवैव=नव-सङ्ख्याकानि द्रव्याणि न न्यूनानि नाप्यधिकानि इत्यर्थः। "समवायेन गुणवत्त्वं क्रियावत्त्वं वा द्रव्यत्वम्" इति द्रव्यसामान्यलक्षणम्। अर्थात् "यत्समवाय-सम्बन्धेन गुणस्य कर्मणो वा आश्रयः, यच्च कस्यापि समवायिकारणं भवेदेव तदेव द्रव्यम्" इति। मीमांसकाः तमः=अन्धकारमपि दशमं द्रव्यं कल्पयन्ति, परन्तु नैय्यायिकानां मतेऽन्धकारस्य तेजोऽभाव एवान्तर्भावः। तमसि च 'नीलं तमश्चलति' इति या प्रतीतिरस्ति सा तु भ्रमरूपैव, किन्तु यदा दीपोऽपसार्यते तदा लोकानां "नीलन्तमश्चलति" इति भ्रमात्मकः प्रत्ययो जायते।

(प्रश्नाः)—कति पदार्थाः?। पदार्थस्य किं लक्षणम्? "विभाग" पदस्य प्रकृते कोऽर्थः? मीमांसकानां मते शक्तिः कथमतिरिक्तः पदार्थः? नैय्यायिकाः कुत्र तस्याः (शक्तेः) अन्तर्भावं कुर्वन्ति? कतिविधं द्रव्यं? द्रव्यस्य किं लक्षणम्? तमो द्रव्यमस्ति न वा? अत्र केषां कीदृशं मतमिति स्पष्टं लिख।

---

* भूरापो ज्योतिरनिलो नभः कालस्तथा दिशा।
आत्मा मन इति प्राहुर्द्रव्याणि नव तद्विदः॥ (ता० र०)

† व्यापकधर्मावान्तरव्याप्यधर्मपुरस्कारेण धर्मिप्रतिपत्त्यनुकूलो विपूर्वकभज-धातोरर्थः। अर्थात् सामान्यधर्मापेक्षया न्यूनवृत्तयो ये धर्माः, परस्परं व्यधि-करणाश्च यावन्तो धर्मा विद्यन्ते तावतां सर्वेषां बोधाय प्रयुज्यमानं वाक्यमेव "विभजन" पदस्यार्थः। यथा—पदार्थानां विभागे पदार्थत्वं सामान्यधर्मः, द्रव्यत्वगुणत्वादयश्च तद्व्याप्यधर्माः, तेच परस्परं भिन्नभिन्नाधिकरणाः सन्त्येव च तादृशा धर्मा भवन्ति, तावतां बोधकं यत् "पृथिव्यप्तेज" इत्यादिवाक्यं तद् विभ-जनं ज्ञेयम्, एवमेव द्रव्याणां विभागे द्रव्यत्वं सामान्यधर्मः, पृथिवीत्वाद्याश्च तद्व्याप्या विशेषधर्माः सन्ति। एषैव रीतिः सर्वत्र विभागस्थले ज्ञेया।

तत्र द्रव्याणीति—पृथिव्यापस्तेजोवायुराकाशं कालो दिगात्ममन इति द्रव्याणि (अ० १ आ० १ सू० ५।) इति वैशेषिक सूत्रे 'इति' शब्दो अव-धारणार्थकः, तेन नवभ्यो अतिरिक्तानि न्यूनानि वा न तर्कयितुं शक्यानी-त्यर्थः। सुवर्णस्य तेजस्येवान्तर्भावः। ईश्वरस्यात्मन्यन्तर्भावः, अन्धकारस्य तेजोऽभावेऽन्तर्भावः, इति नवैव द्रव्याणीत्यवधारणं सुस्थम्।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

रूपरसगन्धस्पर्शसङ्ख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वद्रवत्वस्नेहशब्दबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्काराश्चतुर्विंशतिर्गुणाः ।

गुणान् विभजते—रूपरसेति । 'रूप' मारभ्य 'संस्कार' पर्य्यन्तं चतुर्विंशतिर्गुणा इत्यर्थः । "द्रव्यकर्मभिन्नत्वे सति सामान्यवत्त्वम्" इति गुणलक्षणम् । गुणत्वजातिमत्त्वं वा तत् । एते सर्वे गुणाः समवायसम्बन्धेन द्रव्यमात्रवृत्तयः । सङ्ख्यापरिमाणपृथक्त्वसंयोगविभागाः सर्वद्रव्यवृत्तयः । परत्वापरत्वे मूर्त्तद्रव्येषु सर्वेषु वर्त्तेते नतु विभुषु इत्यादि ज्ञेयम् । अधिकमग्रे मूल एव स्पष्टीभविष्यति ।

(प्रश्नाः)—गुणस्य किं सामान्यलक्षणम् ? कति गुणाः ? केच ते ?।

उत्क्षेपणापक्षेपणाकुञ्चनप्रसारणगमनानि पञ्च कर्माणि ।

कर्माणि विभजते—'उत्क्षेपणे' ति । उत्क्षेपणम्, अपक्षेपणम्, आकुञ्चनम्, प्रसारणम्, गमनम् एतानि पञ्च कर्माणीत्यर्थः । संयोगभिन्नत्वे सति संयोगासमवायिकारणं कर्म । अथवा कर्मत्वजातिमत् कर्म' इति * कर्मलक्षणम् । भ्रमणादीनामितरेषां कर्मणां गमन एवान्तर्भावः, तस्मात्पञ्चैव कर्माणि न

---

* "तार्किकरक्षासारसङ्ग्रहे"—"समुच्चितयोः संयोगविभागयोरसमवायिकारणं कर्म" इत्युक्तम् । तत्र संयोगस्य विभागजनकत्वे सति संयोगजनकत्वं विभागस्यापि संयोगाजनकत्वे सति विभागजनकत्वं कर्मणां तूभयजनकत्वमिति भेद इति भाव इति कोलाचल **मल्लिनाथ**रचितनिष्करटकाख्या व्याख्या ॥

रूपरसेति—यद्यपि "रूपरसगन्धस्पर्शाः संख्याः परिमाणानि पृथक्त्वं संयोग विभागौ परत्वापरत्वे बुद्धयः सुखदुःखे इच्छाद्वेषौ प्रयत्नाश्च गुणाः" इति सूत्रे (अ० १ आ० १ सू० ६ ।) कणादमहर्षिणा सप्तदश गुणाः स्पष्टं निर्दिष्टाः नाधिकास्तथापि प्रशस्तपादभाष्ये "चशब्दसमुच्चिताश्च गुरुत्व द्रवत्व स्नेह संस्कारादृष्टशब्दाः सप्तैवेत्येवं चतुर्विंशतिर्गुणाः" इत्युक्तत्वात्सप्त गुणा आधिक्येनोहिताः । अतएव एषु तर्करूप पदार्थत्वमिति पूर्वमुक्तम् ।

उत्क्षेपणेति—"उत्क्षेपणमपक्षेपणमाकुञ्चनं प्रसारणं गमनमिति कर्माणि" (सू० ७) इति सूत्रेऽवधारणार्थकेन इति शब्देन पञ्चैव कर्माणीति लभ्यते ।

भ्रमणं रेचनं स्यन्दनोर्ध्वज्वलनमेव च ।
तिर्य्यग्गमनमप्यत्र गमनादेव लभ्यते ॥

इत्युक्तरीत्या भ्रमणादीनां गमनेऽन्तर्भावः ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

दश। भ्रमणं, रेचनं, स्यन्दनम्, ऊर्ध्वज्वलनं, तिर्यग्गमनमिति पञ्चाधिकान्यपि केचित् मन्यन्ते, तन्मतं न युक्तमिति भावः।

परमपरं चेति द्विविधं सामान्यम्।

सामान्यं विभजते—"परम्" इति। अनुवृत्तिप्रत्ययहेतुभूतो धर्मः "सामान्य" मिति सामान्यलक्षणम्। अर्थात् समानावयवसंस्थानासु अनेकासु व्यक्तिषु यत्समानाकारप्रत्ययस्य कारणं तदेव सामान्यम्। यथा सकलासु व्यक्तिषु "अयं गौः अयं गौः" इत्याकारः समानः प्रत्ययो भवति, तस्य हेतुभूतो यो धर्मः गोत्वं नाम, तदेव सामान्यं जातिर्वेत्युच्यते। एवञ्च एकव्यक्तिवृत्ति आकाशत्वादिकं न जातिः। तद् द्विविधम्—परसामान्यम् अपरसामान्यञ्चेति। अधिकदेशवृत्ति परं सामान्यम्। यथा—द्रव्यगुणकर्मसु त्रिषु वर्त्तमानं सत्तारूपम्। अपरं सामान्यं यथा द्रव्यत्वं, गुणत्वं, कर्मत्वं वेत्यादि बोध्यम्। आका-

---

सामान्यमिति—"सामान्यं विशेष इति बुद्ध्यपेक्षम्" (अ० १ आ० २ सू० ३।) "भावोऽनुवृत्तेरेव हेतुत्वात्सामान्यमेव" (सू० ४।) इति सूत्राभ्यां "अयं गौः" "अयं गौः" इत्याद्याकारकानुवृत्त बुद्धिविषयत्वं सामान्यम्। तत्र सर्वापेक्षया परं (व्यापकं) सामान्यं सत्तारूपम्। तच्च द्रव्य गुण कर्मवृत्ति। द्रव्यं सत्, गुणः सन्, कर्म सदिति प्रतीतेः प्राण (जातिविशेष) प्रदं सामान्यं सत्तारूपं त्रिष्वेव। सामान्य विशेष समवायेषु तु प्राणप्रदं सामान्यं न सम्भवति। तेषां नित्यत्वात्। सामान्यं सदित्यादि प्रतीतिस्तु स्वाश्रय-निष्ठ सत्तायाः सामानाधिकरण्येन सामान्ये प्रतीयमानत्वादुपपद्यते। आकाश काल दिगात्ममनसां नित्यत्वेन तेषु साक्षात्प्राणप्रदसत्ताया असम्भवेप्युपाधि-विशेषविशिष्टेषु तेषु प्राणप्रदसत्ताश्रयत्वसम्भवः। इति सङ्क्षेपः। परापर सामान्यं तु द्रव्यत्व पृथिवीत्व घटत्वादि रूपं, तच्चानुवृत्तबुद्धिमपि जनयति। व्यावृत्तबुद्धिमपि जनयति। तथाहि पृथिवीजलतेजोवाय्वादिषु "इदं द्रव्यं" "इदं द्रव्यं" इत्यनुवृत्तबुद्धिविषयत्वमस्ति। द्रव्यगुणकर्मवृत्तिसत्तापेक्षया तु द्रव्यत्वस्य गुणकर्मभ्यां व्यावृत्तत्वाद् व्यावृत्तबुद्धिविषयत्वमप्यस्ति इति। एवं पृथिवीत्वेऽपि द्रव्यत्वापेक्षया व्यावृत्तत्वं घटत्वाद्यपेक्षयानुवृत्तत्वम्। अतएव द्रव्य-त्व पृथिवीत्वादयो जातयः परसामान्यमित्यपरसामान्यमित्युभयथोच्यन्ते। तदुक्तम्—

द्रव्यादित्रिकवृत्तिस्तु सत्ता परतयोच्यते।
द्रव्यत्वादिकजातिस्तु परापरतयोच्यते॥
व्यापकत्वात्परापि स्याद्व्याप्यत्वादपरापि च॥ इति।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

शत्वादि न सामान्यम्, * एकव्यक्तिवृत्तित्वात्।

(प्रश्नाः)—कतिविधं कर्म ? तस्य लक्षणञ्च कीदृक् ? भ्रमणादीनां कुत्रान्तर्भावः ? के च भ्रमणाद्याः ? । सलक्षणं सभेदं सोदाहरणं सामान्यं वर्णय । आकाशत्वादिकं सामान्यमस्ति न वा ?

† नित्यद्रव्यवृत्तयो विशेषास्त्वनन्ता एव ।

विशेषं विभजते—नित्येति । पृथिवी, जलं, तेजो, वायुः इत्येतेषां चतुर्णां द्रव्याणां परमाणवः आकाशः, कालः, दिशा, आत्मा, मनः एतानि च द्रव्याणि, तानि सर्वाणि मेलयित्वा "नित्यद्रव्याणि" इत्युच्यन्ते । नित्यद्रव्येषु वृत्तिर्येषां ते नित्यद्रव्यवृत्तयः विशेषाः अनन्ताः=प्रतिव्यक्तिभिन्ना असङ्ख्याता एवेत्यर्थः।

अयमाशयः—घटपटादीनि अनित्यानि द्रव्याणि स्वस्वावयवैरेव परस्परं भिद्यन्ते, परमाणवादिषु नित्यद्रव्येषु अवयवा एव न सन्ति येन तेषां तन्निमित्तः परस्परं भेदः स्यात्, अस्ति च भेदः, तस्माद्यस्तेषां परस्परं भेदकः पदार्थः स एव "विशेष" इति नैय्यायिकमतम् । स च नैकः किन्तु असङ्ख्यात एव भेद्यव्यक्तीनामनन्तत्वात् । "स्वतोव्यावर्त्तकत्वं विशेषत्वम्" इति विशेषलक्षणम् ।

समवायस्त्वेक एव ।

समवायं निरूपयति—समवायस्त्विति । समवायस्य ‡ विभागो नास्तीत्याह "एक एवे" ति । "नित्यसम्बन्धत्वं समवायत्वम्" इति समवायलक्षणम् ।

(प्रश्नाः)—विशेषस्य किं लक्षणम् ? किमर्थञ्च नैय्यायिकैस्तत्स्वीकारः कृतः ? । समवायस्य लक्षणं ब्रूहि, तत्पदकृत्यञ्च दर्शय ।

---

* अत्राहुरुदयनाचार्याः—

व्यक्तेरभेदस्तुल्यत्वं सङ्करोऽथानवस्थितिः ।
रूपहानिरसम्बन्धो जातिबाधकसङ्ग्रहः ॥
अन्योन्यपरिहारेण भिन्नव्यक्तिनिवेशिनोः ।
सामान्ययोः समावेशो जातिसङ्कर उच्यते ॥ इत्यादि ॥

तत्राकाशकालदिशामेकैकत्वेन अनेकवृत्तित्वासम्भवान्नाकाशत्वादिजातिसम्भव इति निष्कण्टकव्याख्या ।

† "अजातिरेकवृत्तिश्च विशेष इति शिष्यते" इति । (ता० र०)

‡ विभागो हि सामान्यधर्मस्य साक्षात् "न्यूनवृत्तियावद्धर्मप्रकारकज्ञानानुकूलो व्यापारः । पृथिवीत्वादीनां साक्षान्न्यूनवृत्तित्वाभावात् द्रव्येत्यादेर्विभागसिद्धिः । सामान्यधर्मस्य न्यूनवृत्तिश्च वैशेषिकाणां विभाजकोपाधिर्बोध्यः, तेन द्रव्यत्वादेर्भावत्वादिन्यूनवृत्तित्वेऽपि न क्षतिः । इत्थञ्च समवायत्वन्यूनवृत्तिधर्माभावान्न तद्विभाग इति वाक्यवृत्तिः ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अभावश्चतुर्विधः—प्रागभावः प्रध्वंसाभावोऽत्यन्ताभावोऽन्योन्याभावश्चेति ।

अभावं विभजते—अभावश्चेति। "इह घटो नास्ति" "इह पटो नास्ति" इत्यादिनञ्शब्दजन्यप्रतीतिविषयत्वमभावत्वम्" इत्यभावलक्षणम् । स प्राग-भावादिभेदेन चतुर्विधः। प्रागभावादीनां लक्षणमुदाहरणञ्चाग्रे मूल एव स्फुटी-भविष्यति, अधिकं तत्र वक्ष्यामः।

(प्रश्नः)—अभावस्य लक्षणं भेदञ्च लिख ।

इत्युद्देशप्रकरणम् ।

तत्र गन्धवती पृथिवी । सा*द्विविधा। नित्या अनित्या

---

* विधीयते विभज्यते आभ्यामिति विधाशब्दो विभाजकधर्मपरः । द्वे विधे

अभाव इति—यद्यपि "धर्मविशेषप्रसूता" दित्यादि (वै० सू० ४) सूत्रे कणादमहर्षिणा अभावो नोक्त स्तथापि "कारणाभावात्कार्याभावो नतु कार्या-भावात्कारणाभावः" (वै० अ० १ आ० २ सू० १-२) इत्यादि सूत्रेष्वभावो महर्षिणा समुल्लिखित एवेत्युक्तम् । अभावपदार्थस्यायमाशयो यत्प्रायशः सर्वाणि वस्तूनि अन्तवन्ति भवन्ति । तत्रान्तो हि त्रिविधः, वस्तुकृतो देशकृतः कालकृतश्च । तत्र "घटः पटो न" "गौरश्वो न" इत्यादि प्रतीतिगम्यो घटस्य पटे, गोश्वाश्वे योऽन्तः स वस्तु कृतोऽन्त इत्युच्यते । अयमेव वस्तुकृतोऽन्तः सर्वत्र भेदः,—अन्योन्याभावः, इत्यादि शब्दैरुल्लिख्यते। द्वितीयो देशकृतोऽन्तः, स च "भूतले घटो न" जले गन्धो न" इत्यादि प्रतीतिगम्यो भवति अत्र घट-गन्धयोः देशान्तरे पृथिव्यां च सत्वेऽपि एतद्भूतलरूपदेश, जलरूपदेशा-वच्छेदेनाभावः तयोः प्रतीयते, इत्ययं देशकृतोऽभावः । अयमेव देशकृतोऽ-भावोऽत्यन्ताभाव इत्युच्यते । तृतीयः कालकृतोऽन्तः । स च "इदानीं घटो नास्ति किन्तु भविष्यति" । तथा इदानीं घटो नास्ति किन्तु ध्वस्तः" इत्यादिकालावगाहिप्रतीतिगम्यः । इमावेव प्रागभावप्रध्वंसाभावभेदेन भिन्नौ कालकृतावन्तावुच्येते। तदेवं वस्तुदेशकालप्रयुक्तस्यान्तस्य त्रिविधत्वेऽपि काल-कृतान्तस्य द्वैविध्यमादाय चतुर्विधो अभाव इत्युच्यते ।

इत्युद्देश प्रकरणम् ।

अथ लक्षण प्रकरणम्

तत्र गन्धवती पृथिवीति—अयं भावः—अव्याप्ति,—अतिव्याप्ति,

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

च । नित्या परमाणुरूपा, अनित्या कार्यरूपा । सा पुनस्त्रिविधा, शरीरेन्द्रियविषयभेदात् । शरीरमस्मदादीनाम् । इन्द्रियं गन्धग्राहकं घ्राणं नासाग्रवर्ति । विषयो मृत्पाषाणादिः ।

लक्षणकरणप्रस्तावे क्रमप्राप्तायाः पृथिव्याः, प्रथमं लक्षणमाह—"गन्धवती" इति । तत्र=पृथिव्यादिषु मध्ये गन्धवती=समवायेन गन्धवती पृथिवी । "समवायेन गन्धवत्त्वं पृथिव्या लक्षणम्" । कालिकादिसम्बन्धेन कालादावतिव्याप्तिवारणाय "समवायेन" इति पदं लक्षणे निवेशितम् । उक्तञ्च महर्षिणा—"रूपरसगन्धस्पर्शवती पृथिवी" (वै० २।१।१) इति । तेन नानारूपत्वादीनि अपि पृथिव्या लक्षणानि बोध्यानि । तां पृथिवीं विभजते—"सा द्विविधे" ति । नित्या अनित्या चेत्यर्थः । नित्यां दर्शयति—"परमाणुरूपे" ति । परमाणुलक्षणा पृथिवी नित्येत्यर्थः ।

जालान्तरगते भानौ सूक्ष्मं यद् दृश्यते रजः ।
तस्य षष्ठतमो भागः परमाणुः स उच्यते ॥

अनित्यामाह—"कार्यरूपे" ति । मूर्त्तत्वे सति निरवयवत्वं परमाणुत्वम् । द्व्यणुकाद्यवयववती पृथिवी सर्वाप्यनित्येत्यर्थः । अनित्यां विभजते—"त्रिविधे" ति ।

विभाजकधर्मो यस्याः सा द्विविधा=विभाजकधर्मद्वयविशिष्टेत्यर्थः । नित्यपदं नित्यत्वपरम् । अनित्यपदमनित्यत्वपरम् । तयोरभेदसम्बन्धेन विभाजकधर्मद्वयेऽन्वयः । तथा च—नित्यत्वानित्यत्वाभिन्नविभाजकधर्मद्वयविशिष्टा इत्यन्वयबोध इति निरुक्तिः । एषैव गतिरन्यत्रापि ज्ञेया ।

असम्भवरूप दोषत्रय रहितं यद्विवक्षितवस्तुनो अनुगमकं रूपं तल्लक्षणमित्युच्यते । तस्य च प्रायशः, इतरव्यावृत्तिः फलं भवति । तत्र प्रकृते पृथिवीमात्रस्यानुगमकं जलादिभ्यो व्यावृत्तं रूपं किम् इति जिज्ञासायां "गन्धवती पृथिवी" इत्युक्तम् । भूम निन्दा प्रशंसासु" इत्यादिना मतुबर्थः प्राशस्त्यम् । प्रशंसा अत्र प्रकर्षः । एवञ्च पृथिव्यां समवाय सम्बन्धेन गन्ध उत्पद्यते । जलादौ तु पृथिवीसंयोगात्केवलं गन्धो भासते नतूत्पद्यते । कार्यञ्चोपादानकारणेन सहाव्यभिचारि भवति । अयमेव कार्यकारणयोः कार्ये कारणस्याव्यभिचारिसम्बन्धरूपः प्रकर्षो मतुपा विवक्षितः । तथाच मतुप्प्रत्ययबलात्समवायेन गन्धजनकत्वं पृथिव्या लक्षणं पर्यवसन्नम् । तच्च जलादौ नास्ति, इति नातिव्याप्तिः । सर्वस्यामपि पृथिव्यां गन्धोऽस्तीति न [illegible]

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

तत्र * शरीररूपां पृथिवीं दर्शयति "शरीर" मिति । तल्लक्षणन्तु—आत्मनो भोगायतनं शरीरम् † आत्मनः सुख-दुःखरूपभोगस्य आयतनं = स्थानं शरीरम् । चेष्टाश्रयो वा—अथवा—हिताहितप्राप्तिपरिहारानुकूला क्रिया चेष्टा, तस्या आश्रयः शरीरम् । सुखदुःखान्यतरसाक्षात्कारो भोगः । भोग उपभोगश्चेत्यनर्थान्तरम् । पार्थिवं शरीरं केषामस्तीत्याकाङ्क्षायामाह—"अस्मदादीनाम्" इति । इन्द्रियं लक्षयति—"गन्धग्राहकम्" इति "गन्धग्राहकमिन्द्रियं घ्राणम्" इति योजना । गन्धग्राहकम्=गन्धज्ञानकरणमित्यर्थः । चक्षुरादावतिव्याप्तिवारणाय "गन्धग्राहकम्" इत्युक्तम् । तस्य स्थानं (गोलकं) दर्शयति—"नासाग्रेति" कालादावतिव्याप्तिवारणाय "इन्द्रियम्" इत्युक्तम् । इन्द्रियसामान्यलक्षणन्तु—'शरीरसंयुक्तत्वे सति ज्ञानकारणमतीन्द्रियमिन्द्रियम्" इति बोध्यम् । विषयरूपां पृथिवीं दर्शयति—मृत्पाषाणादि" रिति । द्व्यणुकमारभ्य ब्रह्माण्डपर्यन्तः सर्वोपि गन्धवान् पार्थिवविषय इत्यर्थः । शरीरेन्द्रियभिन्नत्वे सत्युपभोगसाधनं विषय" इति विषयस्य सामान्यलक्षणम् । वस्तुतस्तु—शरीरादिकमपि विषय एव । भेदेन कीर्त्तनन्तु बालधीवैशद्याय ।

(प्रश्नाः)—पृथिवीलक्षणं लिख । कतिविधा सा ? परमाणोः किं लक्षणम् ? शरीरेन्द्रियविषयाणां लक्षणं ब्रूहि । घ्राणेन्द्रियस्य किं लक्षणम् ? पार्थिवशरीरस्य लक्षणं रचय ।

‡ **शीतस्पर्शवत्य आपः । ताश्च द्विविधाः । नित्या**

---

* चेष्टेन्द्रियार्थाश्रयः शरीरम् । (न्या० १।१।११) । शीर्यते प्रतिक्षणं नश्यतीति शरीरम् । तच्च स्थूल–सूक्ष्म–कारणभेदात् त्रिविधमिति **वेदान्तिनः** ।

† गन्धवच्छरीरं पार्थिवशरीरम् । गन्धवदिन्द्रियं पार्थिवेन्द्रियम् । गन्धवान् विषयः पार्थिवविषय इत्यतिबालोपयोगी विवेकः ।

‡ शीतश्चासौ स्पर्शश्च शीतस्पर्शः । स विद्यते आसामिति शीतस्पर्शवत्यः । तासां भावः शीतस्पर्शवत्त्वम् । तच्च–शीतस्पर्श एव । "मतुबन्ताद्विहितो भावप्रत्ययः प्रकृतिं गमयति" इति सिद्धान्तात् । शीतस्पर्श आधेयः । अधिकरणमापः । आधेयता शीतस्पर्शनिष्ठा । अधिकरणता अब्निष्ठा । तथा च—शीतस्पर्शनिष्ठाधेयतानिरूपिताधिकरणताश्रयत्वमपां लक्षणम् । लक्ष्या आपः । लक्ष्यता अप्सु ।

शीत स्पर्शवत्य आप इति—अत्रापि पूर्ववत्समवायेन शीतस्पर्शवत्त्वं जलस्य लक्षणम् । पृथिव्यादौ तु शीतस्पर्शो जलसंस्पर्शाद्भासते न तु साक्षादुत्पद्यते । अतएव मत्वर्थबलात्प्रकर्षेण (समवायेन) शीतस्पर्शो जल एव नतु पृथिव्याम् । इति समवायेन शीतस्पर्शजनकत्वं जलस्य लक्षणमव्याप्त्यतिव्याप्ति दोषरहितं सिद्धम् ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अनित्याश्च । नित्याः परमाणुरूपाः । अनित्याः कार्यरूपाः । ताः पुनस्त्रिविधाः । शरीरेन्द्रियविषयभेदात् । शरीरं वरुण-लोके । इन्द्रियं रसग्राहकं रसनं जिह्वाग्रवर्ति । विषयः सरित्समुद्रादिः ।

क्रमप्राप्तं जलं लक्षयति—"शीते" ति । "समवायेन शीतस्पर्शवत्त्वं जलत्वम्" इति जललक्षणमित्यर्थः । कालिकादिसम्बन्धमादाय कालादावतिव्याप्तिवारणाय "समवायेन" इत्युक्तम् । "तेज" आदावतिव्याप्तिवारणाय "शीत"—इति । जलं विभजते "ताश्च" इति । नित्यानित्यभेदेन द्विविधं जलमित्यर्थः । नित्यजलं दर्शयति—"परमाणुरूपा" इति । शीतस्पर्शवत्त्वे सति परमाणुरूपं जलं नित्यं जलमित्यर्थः । "अनित्या" इति । द्व्यणुकमारभ्य सर्वं सावयवं जलमनित्यमिति बोध्यम् । अनित्यजलस्य विभागमाह—"पुन" रिति । शरीररूपं जलं कथं नोपलभ्यते इत्याकाङ्क्षां शमयितुमाह—"शरीरं वरुण-लोक" इति । वरुणो जलाधिष्ठातृदेवविशेषः । अस्मदादीन्द्रियागोचरे वरुणलोके जलीयं शरीरमस्ति, अतोऽस्माकमिन्द्रियेण तस्य प्रत्यक्षं न भवतीति भावः । इन्द्रियरूपं जलं दर्शयति—"इन्द्रियम्" इति । रसग्राहकं जिह्वाग्रवर्तीन्द्रियं रसनमिन्द्रियं जलीयमित्यर्थः । इदमेव रसनेन्द्रियलक्षणमिति बोध्यम् ।

त्वगादावतिव्याप्तिवारणाय "रसग्राहकम्" इत्युक्तम् । रसनेन्द्रियसन्निकर्षादिष्वतिव्याप्तिवारणाय "इन्द्रियम्" इत्युक्तम् । विषयरूपं जलमाह—"विषय" इति । आदिना तडाग, हिम, करक, वर्षाबिन्दूनां परिग्रहः । शिष्टं पूर्ववत् । रसविषयकसाक्षात्कारजनकत्वे सति इन्द्रियत्वं रसनेन्द्रियलक्षणम्" इति सारार्थः ।

(प्रश्नाः)—अत्र पृथिवीग्रन्थवत् स्वयं प्रश्नाः कल्पनीयाः ।

उष्णस्पर्शवत्तेजः । तच्च द्विविधं नित्यमनित्यं च । नित्यं परमाणुरूपम् । अनित्यं कार्यरूपम् । तत् पुनस्त्रिविधं—शरीरे-

---

लक्ष्यतावच्छेदकमप्त्वम् । लक्ष्यतावच्छेदकावच्छिन्ना आपः । तासु अप्सु शीतस्पर्शनिष्ठाधेयतानिरूपिताधिकरणताश्रयत्वं वर्तत एवेति कृत्वा लक्षणसमन्वयः । एषैव दिक् "उष्णस्पर्शवत्तेज" इत्यादिलक्षणेषु यथायोगमनुसरणीया ।

उष्णस्पर्शवत्तेज इति । अत्रापि पूर्वरीत्या समवायेन उष्णस्पर्शजनकत्वं तेजसो लक्षणम्, पृथिव्यादौ तु उष्णस्पर्शस्तेजःसंयोगा द्भासते नतूत्पद्यते, इति नातिव्याप्तिः ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

न्द्रियविषयभेदात् । शरीरमादित्यलोके प्रसिद्धम् । इन्द्रियं रूपग्राहकं चक्षुः, कृष्णताराग्रवर्ति । विषयश्चतुर्विधः, भौम-दिव्योदर्याकरजभेदात् । भौमं वह्न्यादिकम् । अविन्धनं दिव्यं विद्युदादि । भुक्तान्नपरिणामहेतुरुदर्यम् । आकरजं सुवर्णादि ।

तेजसो लक्षणमाह—'उष्णस्पर्शवदि' ति । समवायेन उष्णस्पर्शवत्त्वं तेजसो लक्षणम्" इत्यर्थः । अथास्य पदकृत्यमुच्यते—जलादावतिव्याप्तिवारणाय "उष्णे" ति । कालिकादिसम्बन्धमादाय कालादावतिव्याप्तिवारणाय 'समवायेन' इति । भास्वरशुक्लरूपवत्त्वं तेजस्त्व" मिति तेजसोऽपरं लक्षणम् । वह्न्यादौ उष्णः स्पर्शः, आदित्यप्रभादौ च भास्वरं, शुक्लरूपं लोके प्रसिद्धम् । यत्पर-प्रकाशकं तद्भास्वरमित्युच्यते । तेजो विभजते–'तच्चे' ति । परमाणुरूपं नित्यं तेजः । कार्यरूपन्तु द्व्यणुकादि सर्वं सावयवमनित्यमित्यर्थः । कार्यरूपं विभजते—"पुन" रिति । "शरीर" मिति—तैजसं शरीरमयोनिजं सूर्यलोके प्रसिद्धमित्यर्थः । तेजस इन्द्रियमाह—"इन्द्रियम्" इति । घ्राणादावतिव्याप्तिवारणाय "रूपग्राहक" मिति । कालादावतिव्याप्तिनिरासाय "इन्द्रिय" मिति । रूपविषयकसाक्षात्कार-करणत्वे सति इन्द्रियत्वं चक्षुषो लक्षणमिति सारः । तस्य स्थानं दर्शयति—"कृष्णतारे" ति । तेजसो विषयं विभजते—"विषयश्चतुर्विध" इति । 'भौम' मित्यादि—भूमौ भवं भौमम् । दिवि भवं दिव्यम् । उदरे भवमुदर्यम् । आकरे खन्यां जायत इति आकरजमिति व्युत्पत्तिलभ्योऽर्थः । भौमं तेजो दर्शयति—"वह्न्यादी" ति । काष्ठादिरूपपार्थिवेन्धनजन्यमित्यर्थः । आदिना प्रदीपादेः परिग्रहः । दिव्यमाह—'अविन्धनम्" इति । आपः जलान्येव * इन्धनमुद्दीपकं यस्येत्यर्थः । आदिना रविवाडवानलादिपरिग्रहः । उदर्यं दर्शयति "भुक्त" ति । भुक्तस्य अन्नस्य ओदनादेः यः परिणामः रसरुधिरमांसमलादिरूपेण परिवर्त्तनं तस्य हेतु निमित्तकारणं जाठराग्निरित्यर्थः । "आकरजम्" इति । आकरः=खनिः तत्र जातमित्यर्थः । "सुवर्णादी" ति । आदिना रजतहीरका-दिपरिग्रहः † ।

---

* "इन्धी दीप्तौ" इति धातोः "करणाधिकरणयोश्च" (३।३।११७) इति सूत्रेण करणे ल्युटि "युवोरनाकौ" (७।१।१) इत्यनादेशे च सति निष्पन्न इन्धनशब्दो दीप्तिसाधनपरो नतु काष्ठत्वविशिष्टपरः । एवञ्च आप इन्ध-नानि दीप्तिसाधनानि यस्य तत् अबिन्धनमित्यस्य व्युत्पत्तिर्ज्ञेया । दीपनत्वञ्च-दहनावयवैर्महादहनोत्पादने सहकारित्वम् ।

† यद्यपि चन्द्रकिरणादिरूपतेजसि उष्णस्पर्शो नोपलभ्यते तथापि तत्र तदन्तः पातितजलस्पर्शेनाभिभवादग्रहः । रत्नकिरणादौ पार्थिवस्पर्शेनाभिभवाद-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

(प्रश्नाः)—तेजसः किं लक्षणम ? कतिविधञ्च तत ? अनित्यतेजसः के भेदाः ? तैजसेन्द्रियस्य लक्षणं लिख । किं माकरजं तेजः ? इत्यादि स्वयमप्यूहनीयम् ।

रूपरहितस्पर्शवान्वायुः । स द्विविधः । नित्योऽनित्यश्च । नित्यः परमाणुरूपः । अनित्यः कार्यरूपः । स पुनस्त्रिविधः शरीरेन्द्रियविषयभेदात् । शरीरं वायुलोके । इन्द्रियं स्पर्शग्राहकं त्वक् सर्वशरीरवर्ति । विषयो वृक्षादिकम्पनहेतुः । शरीरान्तः सञ्चारी वायुः प्राणः, स एकोप्युपाधिभेदात् प्राणापानादिसञ्ज्ञां लभते ।

वायोर्लक्षणमाह——"रूपरहिते" ति । "रूपरहितत्वे सति स्पर्शवत्त्वं" वायोर्लक्षणमित्यर्थः । आकाशादावतिव्याप्तिवारणाय "स्पर्शवान्" इति । पृथिव्यादावतिव्याप्तिवारणाय "रूपरहिते" ति । पूर्ववदस्यापि नित्यानित्यादिविभागमाह—"स द्विविध" इति स्पष्टम् । "शरीरम्" इति—वायवीयं शरीरं † वायुलोके आगमेन प्रसिद्धम् । वायवीयमिन्द्रियं लक्षयति—"इन्द्रियम्" इति । स्पर्शग्राहकम्=स्पर्शनप्रत्यक्षकरणम् । चक्षुरादावतिव्याप्तिवारणाय "स्पर्शग्राहकम्" इति । कालादावतिव्याप्तिनिरासाय "इन्द्रिय" मिति । वायवीयं विषयं दर्शयति—"विषय" इति । ननु—"प्राण" नामकवायोः कुत्रान्तर्भाव इत्याह —"शरीरान्तःसञ्चारी" इति । तथाच-प्राणस्य विषयवायावेवान्तर्भावः इत्यर्थः । उक्तञ्च-"प्राणादिस्तु महावायुपर्यन्तो विषयो मत" इति । 'स एक' इति । एकोऽपि प्राण उपाधिभेदात्=स्थानभेदात् प्राणादिभिन्नभिन्ननामवान् भवतीत्यर्थः ।

अयं भावः—"अन्" प्राणने-अस्माद्धातोः प्राद्युपसर्गयोगात् अर्थभेदो बोध्यः । सच हृदयादिस्थानभेदनिमित्तेन भवति । तथाच—मुखनासिकाभ्यां निर्गमनप्रवेशनात् प्राणः । मलादीनामधोनयनात् अपानः । आहारेषु पाकार्थं जाठराग्नेः समुन्नयनात् समानः । अन्नादेरूर्ध्वनयनात् उदानः । नाडीमुखेषु वितन-

---

ग्रहः चक्षुरादौत्वनुद्भूतत्वात्स इति ज्ञेयम् ।

* अयमेव वायुलोको "मरुतां लोक" इति वेदे प्रसिद्धम् ।

प्राणापानादीति.

हृदि प्राणो गुदेऽपानः समानो नाभिमण्डले ॥
उदानः कण्ठदेशस्थो व्यानः सर्वशरीरगः ॥१॥

इति व्यासवचनात् हृदयादिप्रदेशे प्राणनापाननादिक्रियाकरणेनैकस्यैव वायोः प्राणापानादिभेदा इत्यर्थः ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

नात् व्यानः। एवमेकस्यैव वायोः क्रियास्थानाभ्यां भेदेन व्यवहारः। केचित्तु—नाग-कूर्म-कृकल-देवदत्त-धनञ्जयात्मकाः पञ्चान्येऽपि वायवः सन्तीति मन्यन्ते, तेषां प्राणा एवान्तर्भावः। उद्गीर्णस्य हेतुर्नागः। उन्मीलनस्य हेतुः कूर्मः। क्षुधायाः कृकलः। विजृम्भणस्य देवदत्तः। पोषणस्य धनञ्जयः।

(प्रश्नाः)—सपदकृत्यं वायोर्लक्षणं स्पष्टीकुरु। प्राणवायोः कुत्रान्तर्भावः? कतिविधश्च स इति सप्रपञ्चं निरूप्यताम्।

शब्दगुणकमाकाशम्, तच्चैकं विभु नित्यं च।

आकाशस्य लक्षणमाह—"शब्दगुणक" मिति। शब्दो गुणो यस्य तत्। "समवायेन शब्दवत्त्वमाकाशस्य लक्षण" मित्यर्थः। आकाशे शब्द एवैको विशेषगुण इति बोधनाय "गुण" पदं दत्तम्। उक्तं हि—

रूपं गन्धो रसः स्पर्शः स्नेहः सांसिद्धिको द्रवः।
बुद्ध्यादिभावनान्ताश्च शब्दो वैशेषिका गुणाः॥ इति।

तच्चैकमिति—आकाशस्य अनेकत्वे=विभागे न किञ्चित् प्रमाणमस्तीति भावः। अत एव सर्वत्र शब्दोपलम्भात् विभुरस्तीत्याह "विभु" इति। विभुत्वञ्च सर्वमूर्त्तसंयोगित्वम्। मूर्त्तत्वञ्च क्रियाश्रयत्वम्। पृथिव्यप्तेजोवायुमनांसि एतानि पञ्च 'मूर्त्तानि' उच्यन्ते। पृथिवी, आपः, तेजः, वायुः, आकाशश्च एतानि पञ्च "भूत" पदवाच्यानि। सर्वैर्मूर्त्तद्रव्यैः सहाकाशस्य संयोगोस्तीत्यतो "विभु" इदमित्युक्तम्। नित्यश्च=अस्योत्पत्तिविनाशौ नैव स्त इति भावः।

अतीतादिव्यवहारहेतुः कालः। स चैको विभुर्नित्यश्च।

कालस्य लक्षणमाह—"अतीते" ति। अतीत आदिर्यो व्यवहारः अर्थात् "घटोऽतीतः, पटो भविष्यन्, मठो वर्त्तमान" इत्याकारको यः शब्दप्रयोगः तस्य हेतुः=असाधारणं कारणं "काल" इत्यर्थः।

वर्त्तमानविध्वंसप्रतियोगित्वमतीतत्वम्। वर्त्तमानप्रागभावप्रतियोगित्वं

नित्यमिति। यद्यपि 'तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः, आकाशाद्वायुः, वायोरग्निः, अग्नेरापः, अद्भ्यः पृथिवी' इत्याद्युपनिषत्सु आकाशस्यापि परमात्मसकाशादुत्पत्तिः श्रूयते, तथापि 'आकाशवत्सर्वगतश्च नित्यः'। इत्यादि श्रुतौ आकाशस्यापि सर्वगतत्वेन नित्यत्वेन च परमात्मोपमानत्वेन वर्णनात् व्यावहारिकं नित्यत्वमाकाशस्याप्यस्तीति सिद्ध्यति। तदेव च श्रुत्युक्तं व्यावहारिकं (वाय्वाद्यपेक्षया चिरस्थायित्वरूपं) नित्यत्वं नैय्यायिकैरनूद्यते, पारमार्थिकदृशा तु आकाशस्यापि पूर्वोक्तश्रुत्या जन्यत्वमिति न विरोधः। एवं कालस्य दिशश्चापि नित्यत्वं नैय्यायिकैरुच्यमानं व्यावहारिकं, न पारमार्थिकमिति दिक्। एवमग्रेऽपि बोध्यम्।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

भविष्यत्त्वम् । वर्त्तमानोपाधिसम्बन्धित्वं वर्त्तमानत्वम् । अयं कालः कालिकसम्बन्धेन पदार्थमात्रस्याधारः सर्वकार्यनिमित्तकारणञ्चेति बोध्यम् ।

(प्रश्नाः)—आकाशस्य किं लक्षणम् ? कानि मूर्त्तानि द्रव्याणि ? कानि च भूतानि ? भूतमूर्त्तयोर्लक्षणं ब्रूहि । एवं कालप्रश्नः स्वयं कल्प्यः ।

प्राच्यादिव्यवहारहेतुर्दिक् । सा चैका नित्या विभ्वी च ।*

दिशो लक्षणमाह—"प्राच्यादि" इति । 'इयं प्राची, इयमवाची, इयं प्रतीची इयमुदीची' इत्यादिर्यो व्यवहारः=शब्दप्रयोगः तस्यासाधारणं कारणं दिगित्यर्थः। परमाण्वादावतिव्याप्तिनिरासाय विशेषणादलम्। आकाशादावतिव्याप्तिनिवारणाय 'असाधारणम्' इत्युक्तम्। वस्तुतो दिशो विभागो नास्तीत्याह—"साचैका" इति । कालवन्नित्या च । यदि दिगेकैव, कथं तर्हि प्राच्यादिव्यवहार इति चेत्, उपाधिद्वारेति जानीहि। अर्थात् उदयाचलसंयुक्ता दिक् उदीची। मेरोर्व्यवहिता दक्षिणा। सूर्योदयसन्निहिता दिक् प्राची । तद्व्यवहिता अर्थात् अस्ताचलसन्निहितदेशावच्छिन्ना दिक् प्रतीची ।

ज्ञानाधिकरणमात्मा स द्विविधः । † जीवात्मा परमात्मा चेति । तत्रेश्वरः सर्वज्ञः ‡ परमात्मा एक एव सुखदुःखादिरहितः । जीवात्मा प्रतिशरीरं भिन्नो विभुर्नित्यश्च ।

आत्मनो लक्षणमाह—"ज्ञाने" ति । समवायेन ज्ञानाधिकरणमात्मनो लक्षणम्। ज्ञानस्याधिकरणं ज्ञानाधिकरणम् । निरूपितत्वं षष्ठ्यर्थः। अधिकरणत्वमाश्रयत्वम्। तथा च—ज्ञाननिरूपिताश्रयत्वमात्मनो लक्षणमित्यर्थः। आत्मानं विभजते "स द्विविध" इति । विभाजकधर्मद्वयविशिष्ट इत्यर्थः। परमात्मनो लक्षणमाह—'तत्रे' ति । तयोर्मध्ये सर्वज्ञः=सर्वविषयकज्ञानवानित्यर्थः। सर्वज्ञत्वं सर्वशक्तिमत्त्वञ्च परमात्मनो लक्षणम्। अथवा § 'जग-

---

* "नभः शब्दगुणं कालश्चिरादिव्यवहारकृत् ।
दिशः पूर्वादिधीहेतुः शेषं प्रागेव लक्षितम्" इति (ता० र०)

† देह एवात्मेति चार्वाकः । इन्द्रियाण्यात्मेत्यपरे । प्राण आत्मेत्यन्ये । मन आत्मेत्येके । बुद्धिरात्मेति योगाचाराः । अहम्प्रतीतिवेद्यः (मानसप्रत्यक्षगम्यः) ज्ञानेच्छादिगुणवाँश्चेतनधातुर्देहादिभिन्नः कर्त्ता भोक्ता चेति नैय्यायिकाः। प्रपञ्चो मत्प्रणीतमुक्तावली—**प्रभायां** द्रष्टव्यः ।

‡ नित्यज्ञानामोघेच्छावान् स्वतन्त्रो निर्दुःख इत्यर्थः ।

§ जगदुत्पत्तिस्थितिसंहारकर्त्तेत्यर्थः ।
इदन्तु बोध्यम्—

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

जनकादिकर्तृत्वमीश्वरत्वम्' इतीश्वरस्य लक्षणमित्यर्थः । एकः=अद्वितीय इत्यर्थः । "क्षित्यङ्कुरादिकं कर्तृजन्यं कार्यत्वात् घटवत्" इत्यनुमानेन लाघवादेक एव सिद्ध्यतीति भावः । अन्यस्तु प्रपञ्चस्तु मदीयन्यायतत्त्वसमीक्षायां द्रष्टव्यः । परमात्मनि धर्माधर्मयोरभावात्सुखदुःखाद्युत्पत्तिर्नास्तीत्याशयेनाह "सुखदुःखरहित" इति । "समवायसम्बन्धेन नित्यज्ञानवानीश्वर" इतिवेश्वरस्य लक्षणं बोध्यम् । जीवस्य लक्षणमाह—"जीव" इति । "समवायेन जन्यज्ञानाधिकरणत्वं जीवत्व" मिति जीवस्य लक्षणम् । अयमपि सर्वमूर्त्तसंयोगित्वाद्विभुः, उत्पत्तिविनाशाभावात् नित्यः=अनाद्यनन्त इत्यर्थः । जीवा असङ्ख्याताः सन्ति । सुखादिभोगवैचित्र्यात् प्रतिशरीरं भिद्यन्ते अनन्ताश्चेत्यर्थः ।

(प्रश्नाः)—आत्मनः किं लक्षणम् ? कतिविधश्च सः ? जीवेश्वरयोः को भेद इति सप्रमाणं ब्रूहि ।

सुखदुःखाद्युपलब्धिसाधनमिन्द्रियं मनः । तच्च प्रत्यात्मनियतत्वादनन्तं परमाणुरूपं नित्यं च ।

मनसो लक्षणमाह—"सुखदुःखादी" ति । सुखदुःखानां जीवात्मवृत्तिविशेषगुणानां या उपलब्धिः=साक्षात्कारः तस्य साधनं=साधकतमं करणं यदिन्द्रियं तत् "मन" इत्यर्थः । सुखादिसाक्षात्कारकारणत्वे सति इन्द्रियत्वं मनसो लक्षणम् । चक्षुरादावतिव्याप्तिनिरासाय "इन्द्रियत्वम्" उक्तम् । तच्च मनः प्रत्यात्मनियतत्वात्=प्रतिजीवं ज्ञानोत्पादाय संयोगसम्बन्धेनावश्यकत्वात्, अनन्तम्=असङ्ख्यम्, प्रतिशरीरं भिन्नं परमाणुरूपं=परमसूक्ष्मं निरवयवं, नित्यं=पृथिव्यादिपरमाणुवदुत्पत्तिविनाशरहितमनादीत्यर्थः ।

समाप्तं द्रव्यनिरूपणम् ।

(प्रश्नः) मनसो लक्षणं सपदकृत्यं लिखत ।

*** चक्षुर्मात्रग्राह्यो गुणो रूपम् । तच्च शुक्लनीलपीतरक्तहरितकपिशचित्रभेदात्सप्तविधम् । पृथिवीजलतेजोवृत्ति । तत्र**

आत्मजन्या भवेदिच्छा इच्छाजन्या भवेत्कृतिः ।
कृतिजन्या भवेच्चेष्टा चेष्टाजन्या भवेत्क्रिया ॥ इति ।

* चक्षुर्मात्रेण ग्राह्यः चक्षुर्मात्रग्राह्यः । जन्यत्वं तृतीयार्थः । ग्रहधातोर्ज्ञानमर्थः । ण्यप्रत्ययस्य विषयोऽर्थः । तथा च—चक्षुर्मात्रजन्यज्ञानविषयत्वे सति गुणत्वं रूपस्य लक्षणम् । चक्षुर्मात्रजन्यं यज्ज्ञानम् "इदं रूपम्" इत्याकारकं ज्ञानं तद्विषयत्वस्य रूपे सत्त्वात्तदन्वयः इति निष्कर्षः ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

पृथिव्यां सप्तविधम् । अभास्वरं * शुक्लं जले । भास्वरं शुक्लं तेजसि ।

रूपस्य लक्षणमाह—"चक्षुरिति" । चक्षुर्ग्राह्यविशेषगुणत्वं रूपस्य लक्षणमित्यर्थः । बुद्ध्यादिष्वतिव्याप्तिवारणाय 'चक्षुर्ग्राह्ये' ति । सङ्ख्यावारणाय 'विशेषे' ति । स्नेहसांसिद्धिकद्रवत्वयोरतिव्याप्तिवारणाय "मात्र" पदम् ।

यदि "चक्षुर्मात्रग्राह्यजातिमत्त्वं गुणत्वम्" इति लक्षणं क्रियेत तदा लक्षणे "विशेष" पदं न देयम् त्र्यणुकादिवारणाय तु "गुण" पदं निवेशनीयमेव । रूपं विभजते—'तच्चे' ति । रूपमित्यर्थः । शुक्लं, नीलं, पीतं, रक्तं, हरितं, कपिशं, चित्र मिति भेदात् सप्तप्रकारमित्यर्थः । रूपस्याश्रयमाह—'पृथिवी' ति । आश्रयं विभज्य दर्शयति—"तत्र" ति । पृथिवीजलतेजःसमुदाये इत्यर्थः । न भास्वरमभास्वरं पराप्रकाशकं यत् शुक्लं तत् जले, भास्वरं द्रव्यादेः प्रकाशकं यत् शुक्लं तत् तेजसि वर्त्तत इत्यर्थः । वृत्तित्वं सप्तम्यर्थः । जलवृत्ति, तेजोवृत्तीत्यन्वयो बोध्यः ।

(प्रश्नाः) रूपस्य किं लक्षणम् ? कतिविधञ्च तत् ? कुत्र कुत्र च तद् वर्त्तते इति सर्वं स्पष्टं लेख्यम् । रूपलक्षणस्य पदकृत्यञ्च दर्शनीयम् ।

रसनाग्राह्यो गुणो रसः । स च मधुराम्ललवणकटुकषायतिक्तभेदात् षड्विधः । पृथिवीजलवृत्तिः । पृथिव्यां षड्विधः । जले मधुर एव ।

रसस्य लक्षणमाह—"रसने" ति । रसत्वादिजातावतिव्याप्तिवारणाय "गुण" इति । रूपादावतिव्याप्तिवारणाय "रसने" ति । रसं विभजते—"स चे" ति । स रसः मधुरादिप्रकारेण षट्सङ्ख्याक इत्यर्थः । रसस्याश्रयमाह—"पृथिवी' ति । रसस्य आश्रयं विभज्य दर्शयति—"पृथिव्या" मिति । जम्बीरफलादि रूपायां तथैव प्रतीयत इति भावः । जले तु मधुर एव रसो नान्य अम्लादिरित्यर्थः । यदा हरीतक्यादि भक्ष्यते तदा जिह्वावृत्तिमलविशेषस्य नाशात् रसनेन्द्रियेण जलीयमधुररसस्य स्पष्टा प्रतीतिर्जायत इति भावः ।

(प्रश्नौ)—सपदकृत्यं रसस्य लक्षणं लिख्यताम् । तस्याश्रयोऽपि विभज्य प्रदर्श्यताम् ।

घ्राणग्राह्यो गुणो गन्धः । स द्विविधः । सुरभिरसुरभिश्च । पृथ्वीमात्रवृत्तिः ।

---

* यद्यपि—"गुणे शुक्लादयः पुंसि" इति कोशप्रामाण्यात् गुणवाचकशुक्लादिशब्दानां पुंलिङ्गतैवोचिता तथापि प्रकृते "अस्त्रीनियतलिङ्गानां योगे तल्लिङ्गता च" इति विशेषवचनबलेन "रूपम्" इति विशेष्यवाचकपदमनुषज्य शुक्लपदे नपुंसकलिङ्गतायामपि दोषाभावः ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

गन्धस्य लक्षणमाह—'घ्राणे' ति। "घ्राणग्राह्यत्वे सति गुणत्वं" गन्धस्यलक्षणमित्यर्थः। गन्धत्वादिजातावतिव्याप्तिवारणाय "गुण" पदम्। रूपादावतिव्याप्तिनिरासाय 'घ्राणग्राह्य' इति। तस्य विभागमाह—"स द्विविध" इति। प्रकारद्वयविशिष्ट इत्यर्थः। सुरभिः=सुगन्धः पुष्पादिनिष्ठः। असुरभिः दुर्गन्धः मलादिगतः। तस्याश्रयमाह—"पृथ्वी" ति। पृथिव्यामेव गन्धो वर्त्तते नान्यत्रेत्यर्थः।

ननु—जलादावपि गन्ध उपलभ्यते; सत्यम्, परन्तु पृथिवीभागसम्बन्धेनैव (* स्वसमवायिसंयोगेन) गन्धस्य जलादौ प्रतीतिः "यत्र यत्र पृथिवीत्वं तत्र तत्र † गन्धवत्त्वम्" इति नियमात्।

(प्रश्नाः)—गन्धस्य लक्षण, तत्पदकृत्यं तदाश्रयञ्च स्पष्टं वर्णय।

त्वगिन्द्रियमात्रग्राह्यो गुणः स्पर्शः। स च त्रिविधः। शीतोष्णानुष्णाशीतभेदात्। पृथिव्यप्तेजोवायुवृत्तिः। तत्र शीतो जले, उष्णस्तेजसि, अनुष्णाशीतः पृथिवीवाय्वोः।

स्पर्शस्य लक्षणमाह—"त्वगिन्द्रिये" ति। "त्वगिन्द्रियमात्रग्राह्यत्वे सति गुणत्वं" स्पर्शस्य लक्षणमित्यर्थः। सङ्ख्यादिसामान्यगुणादावतिव्याप्तिवारणाय "मात्र" पदम्। रूपादावतिव्याप्तिवारणाय "त्वगिन्द्रिय" इति। स्पर्शत्वादावतिव्याप्तिनिरासाय ‡ "गुण" पदम्। स्पर्शं विभजते—"सचे" ति। स्पर्शस्याश्रयमाह—'पृथिवी' इति। पृथिवी, जलं, तेजः, वायुश्चेति चतुर्ष्वेव द्रव्येषु समवायेन स्पर्शो वर्त्तत इति भावः। आश्रयं विभज्य दर्शयति—"तत्रे" ति। स्पष्टमन्यत्।

(प्रश्नाः)—स्पर्शस्य किं लक्षणम्? कतिविधः सः? कः कः कुत्र कुत्र वर्त्तते? लक्षणपदानां प्रयोजनञ्च दर्शय।

रूपादिचतुष्टयं पृथिव्यां पाकजमनित्यं च। अन्यत्रा-

---

* "स्व" पदेन गन्धग्रहः, तस्य समवायी पृथिवीभागः, तत्संयोगो जले इति परम्परासम्बन्धेन।

† गन्धत्वञ्च गन्ध एव।

‡ यद्यपि अत्रापि परमाणुस्पर्शेऽव्याप्तिवारणाय त्वगिन्द्रियमात्रग्राह्यजातिमत्त्वमेव विवक्षणीयम्, तथा च स्पर्शत्वेऽतिप्रसक्त्या गुणपदमनर्थकमेव, तथापि मृदुत्वकाठिन्ययोर्ग्रन्थकृन्मते अवयवसंयोगविशेषात्मकतया अवयवसंयोगगतवैजात्यस्यापि त्वगिन्द्रियमात्रग्राह्यत्वे संयोगेऽतिव्याप्तिवारणाय गुणत्वसाक्षाद्व्याप्यतादृशजातिमत्त्वस्यैव लक्षणे विवक्षणीयतया तल्लाभायैव गुणपदमवश्यमिति रामरुद्री।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

पाकजम् । नित्यमनित्यं च । नित्यगतं नित्यम्, अनित्यगतमनित्यम् ।

रूपरसगन्धस्पर्शेषु कश्चिद्विशेषं वक्तुमाह—"रूपादी" ति । रूपादिचतुष्टयम्—रूपरसगन्धस्पर्शा इत्यर्थः । "पृथिव्यां पाकज" मिति । विलक्षण (विजातीय) तेजः संयोगः पाकः । तज्जं पाकजमित्यर्थः । "अनित्य" मिति । उत्पत्तिध्वंसशालीत्यर्थः । पृथिवीपरमाणुमारभ्यावयविद्रव्यपर्यन्तं सर्वत्रैव पृथिव्यां रूपादिचतुष्टयं वर्त्तते परन्तु तदनित्यमेव भवति । अन्यत्र=जले, तेजसि, वायौ च * रूपादित्रिकमपाकजं=अग्निसंयोगानुत्पन्नमित्यर्थः । नित्यगतं=जलादिपरमाणुगतं नित्यं भवति । अनित्यगतं—द्व्यणुकाद्यवयविगतन्तु अनित्यमेवेत्यर्थः । इयांस्तु विशेषः—यद् वायौ रूपं रसश्च नास्त्येव ।

इदमत्र बोध्यम्—पाको नाम नानाजातीयस्तेजःसंयोगः कश्चिद्रूपजनकः, रसजनकोऽन्यः, तदपेक्षया गन्धजनकोऽन्यः, तदपेक्षया स्पर्शजनकोऽन्योऽस्ति । एवं रीत्या भिन्नभिन्नप्रकाराः तेजःसंयोगरूपाः पाकाः कार्यविचित्रतया कल्पनीयाः । अतएव कस्मिंश्चिद्धरितवर्णे आम्रफले रसो मधुरः, कुत्रचित्पीतवर्णे तस्मिन्, रसस्त्वम्लोऽनुभूयते । तत्र रूपजनकः पाकोऽन्यो रसजनकश्चान्योऽस्ति ।

एवञ्च एकजातीयेभ्योऽपि पार्थिवपरमाणुभ्यः पाकवशात् विजातीयद्रव्यारम्भो भवति । यदा गौस्तृणं चरति तदा तस्या ग्रामाशये परमाण्वन्तस्तृणनाशो जायते, अथ तृणारम्भकपरमाणुषु विजातीयजठरवर्त्तितेजःसंयोगात्पूर्वरूपादिनाशे सति दुग्धमुत्पद्यते, एवमेव तत्र रसादीनामुत्पत्तिः, ततो दुग्धारम्भकैः परमाणुभिरेव दध्यारभ्यते, तत्रापि रूपरसादीनां पाकवशात्परिवर्तनं बोध्यमिति बालबोधाय पाकप्रक्रियायाः परिचयमात्रं दत्तं पूर्णरीत्या प्रक्रिया तु मत्प्रणीतमुक्तावलीप्रभायां द्रष्टव्या ।

(प्रश्नाः)—रूपादिचतुष्टयं कुत्र कीदृशं वर्त्तते ? पाकस्य किं लक्षणम् ? तं किंचित् परिचयदानेन स्पष्टीकुरु ।

---

* जलादौ गन्धाभावेन रूपादिचतुष्टयस्य बाधितत्वाद्यथायोगमन्वये तात्पर्यमनुसन्धायाह—"**रूपादित्रिकम्**" इति ।

स च पूर्वरूपनाशपूर्वकरूपान्तरोत्पादकतेजःसंयोगः । अन्यथा फलादिपाकं प्रति तेजसः कारणत्वात्, आकाशस्य च सर्वमूर्त्तद्रव्यसंयोगित्वात्, तादृशतेजःप्रतियोगिकसंयोगस्याकाशेऽपि सत्त्वात् "आकाशः पाकवान्" इत्यपि यथार्थः प्रत्ययः स्यात् । स्वरूपान्तरोत्पत्तिमत्त्वावच्छिन्नजनकसम्बन्धस्य पाकपदशक्यत्वे तु नोक्तदोष इति भावः ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

* एकत्वादिव्यवहारासाधारणहेतुः सङ्ख्या । सा नवद्रव्यवृत्तिः । एकत्वादिपरार्धपर्यन्ता । एकत्वं नित्यमनित्यं च । नित्यगतं नित्यम्, अनित्यगतमनित्यम्, द्वित्वादिकं तु सर्वत्रानित्यमेव ।

सङ्ख्याया लक्षणमाह—"एकत्वादी" ति । "एकः द्वौ" इत्यादिरूपो य एकत्वादिव्यवहारः, तस्य असाधारणहेतुः=असाधारणकारणं सङ्ख्या=सङ्ख्यानामको गुण इत्यर्थः । "गणानव्यवहारासाधारणकारणत्वं" सङ्ख्याया लक्षणम् । तस्या आश्रयमाह—"सा" इति । सर्वेषु द्रव्येषु वर्त्तत इत्यर्थः । "एकत्वादी" ति—सा च एकत्वमारभ्य परार्धपर्यन्तास्ति । उक्तञ्च—

एकं दश शतं चैव सहस्रमयुतं तथा ।
लक्षञ्च नियुतं चैव कोटिरर्बुद एव च ॥
वृन्दं खर्वो निखर्वश्च शङ्खःपद्मश्च सागरः ।
अन्त्यं मध्यं परार्धञ्च दशवृद्धया यथाक्रमम् ॥इति॥

एकत्वं विभजते—'एकत्व' मिति । नित्येष्वाकाशादिषु एकत्वं नित्यं यतस्तस्याश्रयो नित्यः । अनित्येषु घटादिषु एकत्वमनित्यमेव, आश्रयस्यानित्यत्वादित्याशयेनाह—"नित्यगतम्" इत्यादि । "द्वित्वादिक" मिति—द्वित्वादिसङ्ख्या सर्वाप्यनित्यैव । अपेक्षाबुद्धिजन्यत्वादिति भावः । "अयमेको घटः, अयमेको घटः" इतीमौ द्वौ घटौ, इत्याकारा बुद्धिरपेक्षाबुद्धिः । बुद्धिर्ज्ञानमित्यर्थः "बुद्धिरुपलब्धिर्ज्ञानमित्यनर्थान्तरम्" (न्या० १ । १ । १५) इति च पारमर्षं सूत्रम् ।

---

* एकादिव्यवहारनिष्ठकार्यतानिरूपितकारणताश्रयत्वं सङ्ख्याया लक्षणम् । एकादिव्यवहारनिष्ठा या कार्यता अयमेकः, इमौ द्वौ, इत्याकारकव्यवहारनिष्ठा कार्यता, तन्निरूपिता या कारणता एकत्वद्वित्वादिसङ्ख्यायाः कारणता, तदाश्रयत्वस्य एकत्वादिसङ्ख्यायां वर्त्तत एवेति सर्वत्र लक्षणसमन्वयः । सङ्ख्यापरिमाणपृथक्त्वसंयोगपरत्वापरत्वलक्षणवाक्येष्वप्ययमेव शाब्दबोधप्रकारो लक्षणघटको विज्ञेयः।

एकत्वादि परार्धपर्यन्ता इति (इमा एकत्वादयः परार्धान्ताः सङ्ख्या वेदे प्रसिद्धा एव नैय्यायिकैरनूद्यन्ते । तथा हि (शु० य० संहितायां १७ अध्याये द्वितीयो मन्त्रः) 'इमा मे अग्न इष्टका धेनवः सन्त्वेका च दश च, दश च शतं च, शतं च सहस्रं च, सहस्रं चायुतं च, अयुतं च नियुतं च, नियुतं च प्रयुतं चार्बुदं च न्यर्बुदं च समुद्रश्च मध्यं चान्तश्च परार्धश्चैता मे अग्न इष्टका धेनवः सन्त्वमुत्रामुष्मिँल्लोके ॥२॥ इति ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

(प्रश्नाः)—सङ्ख्यायाः किं लक्षणम् ? केषु द्रव्येषु सा वर्त्तते ? अपेक्षाबुद्धिजन्या सङ्ख्या कास्ति ?

मानव्यवहारासाधारणकारणं परिमाणम् । नवद्रव्य-वृत्ति । तच्चतुर्विधम्, अणु महद्दीर्घं ह्रस्वं चेति ।

परिमाणस्य लक्षणमाह—"माने" ति । मानं=इयत्ताया अवधारणं तस्य यः "इदमणु, इदं महत्, इदं दीर्घं, इदं ह्रस्वम्" इत्याकारो व्यवहारः, तस्य व्यवहारस्य असाधारणं कारणं परिमाणम् । "परिमितिव्यवहारासाधारण कारणत्वं" परिमाणस्य लक्षणमित्यर्थः । दण्डादावतिव्याप्तिनिरासाय "मान" इत्युक्तम् । कालादावतिव्याप्तिवारणाय "असाधारण" मित्युक्तम् । सङ्ख्याया आश्रयमाह—"नवद्रव्ये" ति । परिमाणं विभजते"–'तच्चतुर्विध" मिति ।

इदन्तु बोध्यम्—परमाण्वाकाशादिनित्यद्रव्यगतं परिमाणं नित्यम् । द्व्यणुकादावनित्ये कार्ये (अवयविनि) द्रव्ये वर्त्तमानमनित्यम् ।

(प्रश्नः)—परिमाणं सप्रपञ्चं निरूपय ।

पृथग्व्यवहारासाधारणं कारणं पृथक्त्वम् । सर्वद्रव्यवृत्ति ।

पृथक्त्वस्य लक्षणमाह—"पृथगि" ति । "अयमस्मात्पृथक्" इति यो व्यवहारः तस्य असाधारणं कारणं पृथक्त्वमित्यर्थः । पृथग्व्यवहारासाधारणकारणत्वं पृथक्त्वस्य लक्षणम् । दण्डादावतिव्याप्तिवारणाय "पृथक्" इति । कालादावतिव्याप्तिवारणाय "असाधारण" मिति । पृथग्व्यवहारत्ववारणाय "कारण" मिति । अस्याश्रयमाह —"सर्वद्रव्ये" ति । नवद्रव्यवृत्तीत्यर्थः ।

संयुक्तव्यवहारासाधारणो हेतुः संयोगः । सर्वद्रव्यवृत्तिः ।

संयोगस्य लक्षणमाह—'संयुक्ते' ति । "इमौ संयुक्तौ" इत्याकारकव्यवहारस्य असाधारणो हेतुः=कारणं सयोग इत्यर्थः । अस्याश्रयमाह—'सर्वद्रव्ये' ति । सर्वेषु पृथिव्यादिद्रव्येषु संयोगो वर्त्तते इत्यर्थः । "द्रव्ययोरेव संयोग" इति नियमोस्तीति भावः । अस्य पदकृत्यं पूर्ववज्ज्ञेयम् । संयोगो द्विविधः—कर्मजः, संयोगजश्चेति । हस्तक्रियया हस्तपुस्तकसंयोग आद्यः । हस्तपुस्तकसंयोगात्कायपुस्तकसंयोगो द्वितीयः * संयोगोऽव्याप्यवृत्तिर्भवति, द्रव्यस्यैकदेशे वर्त्तते इत्यर्थः । प्रपञ्चो मुक्तावल्यादिषु द्रष्टव्यः ।

(प्रश्नाः)—पृथक्त्वं सप्रपञ्चं निरूपय । संयोगस्य किं लक्षणं ? केषु द्रव्येषु च वर्त्तते ?

† संयोगनाशको गुणो विभागः । सर्वद्रव्यवृत्तिः ।

---

* स्वात्यन्ताभावसमानाधिकरण इत्यर्थः । यत्र घटादौ पटादिसंयोगो वर्त्तते तत्रैवान्यावयवावच्छेदेन तदभावोप्यस्त्येव ।

† "संयोगस्तु विरोधी [illegible]

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

विभागस्य लक्षणमाह—"संयोगनाशक" इति । संयोगनाशकः=संयोगनाश (ध्वंस) जनको गुणो विभाग इत्यर्थः । संयोगनाशकत्वविशिष्टगुणत्वं विभागस्य लक्षणम् । क्रियायामतिव्याप्तिवारणाय "गुण" इति । भवति हि क्रियापि संयोगनाशिका । ईश्वरेच्छादिसाधारणकारणेऽतिव्याप्तिवारणाय लक्षणे "असाधारण" पदमपि देयम् । अस्याश्रयमाह—"सर्वद्रव्ये"ति । पृथिव्यादिसर्वद्रव्येषु वर्त्तते इत्यर्थः । विभागो द्विविधः—कर्मजो विभागश्चेति । हस्तक्रियया हस्तपुस्तकविभागः कर्मजः । हस्तपुस्तकविभागात्कायपुस्तकविभागो द्वितीयः ।

परापरव्यवहारासाधारणकारणे परत्वापरत्वे । पृथिव्यादिचतुष्टयमनोवृत्तिनी । ते द्विविधे । दिक्कृते कालकृते चेति । दूरस्थे दिक्कृतं परत्वम्, समीपस्थे दिक्कृतमपरत्वम् । ज्येष्ठे कालकृतं परत्वम्, कनिष्ठे कालकृतमपरत्वम् ।

परत्वापरत्वयोर्लक्षणमाह—परापरे"ति । 'अयमस्मात्पर' इत्याकारकपरव्यवहारासाधारणकारणं परत्वम् । 'अयमस्मादपर' इत्याकारकापरव्यवहारासाधारणकारणमपरत्वमित्यर्थः । दण्डादिवारणाय 'परव्यवहार' इति । कालादावतिव्याप्तिवारणाय 'असाधारण' इति । एवमेव द्वितीयेऽपि बोध्यम् । ते विभजते—"ते द्विविध" इति । दिक्कृते=दैशिकपरत्वापरत्वे । कालकृते=कालिकपरत्वापरत्वे इत्यर्थः । दिक्कृतयोः परत्वापरत्वयोरुदाहरणमाह 'दूरस्थ' इति । कालकृते उदाहरति—"ज्येष्ठ" इति ।

(प्रश्नाः)—विभागस्य लक्षणं ब्रूहि । तद्भेदांश्च प्रदर्शय । विभागलक्षणे 'गुण' पदनिवेशस्य किं फलम ? परत्वापरत्वयोः किं लक्षणम् ? कतिविधं कुत्र कुत्र च वर्त्तते ?

आद्यपतनाऽसमवायिकारणं गुरुत्वम् । पृथिवीजलवृत्ति ।

पृथिव्यप्तेजसां यथा प्रत्यक्षेण सिद्धिः संभवति, तथा वायोः प्रत्यक्षेण सिद्धिर्न संभवति । अतः स्पर्शविशेषेण तदाश्रयभूतो वायुरनुमीयते । तदुक्तम् 'न च दृष्टानां स्पर्श इत्यदृष्टलिङ्गो वायुः' (वै० सू० अ० २ आ० १ सू० १०) इति कणादमहर्षिभिः । किं च नैय्यायिकादिरीत्या द्रव्यविशेषस्य वायोर्यद्यपि तर्कगम्यत्वमस्ति, तथापि तस्य 'वायुः' इति नामकरणं तु श्रुतिमूलकमेव । श्रुतिषु हि 'वायव्यं श्वेत मालभेत भूतिकामः' 'वायु र्वै क्षेपिष्ठा देवता वायुमेव स्वेनभागधेयेनोपधावति, स एवैनं भूतिं गमयति' इत्यादौ वायुशब्दः सञ्ज्ञात्वेन यः श्रुतः स एवैभिरपि व्यवहारार्थं प्रयुज्यते, नान्यः । तदुक्तं कणादाचार्यैः 'तस्मादागमिकम्' (१ अ० २ आ० १ सू० १७) इति ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

गुरुत्वस्य लक्षणमाह—'आद्ये' ति। द्वितीयादिपतनस्य वेगोऽसमवायिकारणमिति वेगेऽतिव्याप्तिवारणाय "आद्ये" ति दण्डादिवारणाय "असमवायि" इति। रूपादिवारणाय "पतन" इति। अस्याश्रयमाह—"पृथिवी" ति। गुरुत्वं पृथिव्यां जले च वर्त्तत इत्यर्थः।

आद्यस्यन्दनाऽसमवायिकारणं द्रवत्वम्। * पृथिव्यप्तेजोवृत्ति। तद् द्विविधं सांसिद्धिकं नैमित्तिकं च। सांसिद्धिकं जले। नैमित्तिकं पृथिवीतेजसोः। पृथिव्यां घृतादावग्निसंयोगजन्यं द्रवत्वम्, तेजसि सुवर्णादौ।

द्रवत्वस्य लक्षणमाह—"आद्ये" ति। आद्यं=प्रथमम् यत् स्यन्दनं=स्रवणं क्रियाविशेषः तस्य असमवायिकारणं यत्, तत् 'द्रवत्वं' नाम गुण इत्यर्थः। अस्य पदकृत्यं गुरुत्वलक्षणवद्बोध्यम्। अस्याश्रयमाह—"पृथिवी" ति। पृथिव्यां तेजसि च वर्त्तते इत्यर्थः। द्रवत्वं विभजते—'तदि' ति। सांसिद्धिकम्=निमित्तानपेक्षाधोदेशप्रसरत्वं, स्वाभाविकमिति यावत्। तत् जले=जल एव वर्त्तते, जलस्य प्रस्रवणस्वभावत्वात्। नैमित्तिकं तेजः संयोगजमित्यर्थः। नैमित्तिकस्याश्रयमाह—'पृथिवीतेजसो' रिति। विभज्य दर्शयति——"पृथिव्या" मिति। उक्तञ्च—

> नैमित्तिकं वह्नियोगात्तपनीयघृतादिषु।
> द्रवत्वं स्यन्दने हेतुर्निमित्तं सङ्ग्रहे तु तत्॥ इति।

(प्रश्नः)—गुरुत्वं द्रवत्वञ्च सप्रपञ्चं निरूपय।

चूर्णादिपिण्डीभावहेतुर्गुणः स्नेहः। जलमात्रवृत्तिः।

स्नेहस्य लक्षणमाह—"चूर्णादी" ति। चूर्णं पिष्टं तदेवादिर्यस्य मृत्तिकादेः स चूर्णादिः, तस्य यः पिण्डीभावः=संयोगविशेषः तस्य हेतुर्निमित्तकारणं यो गुणः स्नेहः। "चूर्णादिपिण्डीभावहेतुत्वे सति गुणत्वं" स्नेहस्य लक्षणमित्यर्थः। पिण्डीभावो नाम चूर्णादिधारणाकर्षणहेतुभूतो विलक्षणसंयोगः। कालादावतिव्याप्तिवारणाय "गुण" पदम्। रूपादावतिव्याप्तिनिरासाय 'पिण्डी भावे' ति।

यत्तु पदकृत्यकारः लक्षणे चूर्णपदं स्पष्टार्थमित्याह, तन्न। लोहादिपिण्डीभावहेतुभूतो योऽग्निसंयोगः,तत्रातिव्याप्तिवारणाय "चूर्ण" पदस्यावश्यकत्वात्।

† श्रोत्रग्राह्यो गुणः शब्दः। आकाशमात्रवृत्तिः।

---

* द्रवत्वं पृथिव्यादित्रिकवृत्तितावच्छेदकमित्यर्थः।

† इदमुपलक्षणम्—शब्दपदशक्यतावच्छेदकतया सिद्धं शब्दत्वजातिमत्त्वं शब्दलक्षणमित्यपि बोध्यमिति नृसिंही।

'निष्क्रमणं प्रवेशन मित्याकाशस्य लिङ्गम्' (वै०अ०२ आ० १सू०२०) इति।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

शब्दस्य लक्षणमाह—'श्रोत्रे' ति। श्रोत्रस्य श्रोत्रेन्द्रियस्य ग्राह्यो=विषयो यो गुणः स शब्द इत्यर्थः। "श्रोत्रग्राह्यत्वे सति गुणत्वं" शब्दस्य लक्षणमिति ज्ञेयम्। शब्दत्वजातावतिव्याप्तिवारणाय लक्षणे "गुण" पदं दत्तम्। तस्यापि श्रोत्रग्राह्यत्वात्। रूपादावतिव्याप्तिवारणाय "श्रोत्रे" ति। अस्याश्रयमाह—'आकाशे' ति। शब्दो विशेषगुणः समवायसम्बन्धेनाकाश एव वर्त्तते नान्यस्मिन्द्रव्य इति भावः। ननु—वीथ्यां कोलाहलः, वने कोलाहलः इत्यादिप्रतीतेर्वीथ्यादिरपि शब्दाश्रय इति चेन्न, वीथीवनादिष्ववच्छेदकतासम्बन्धेन शब्दप्रतीतेः, शब्दस्तु आकाशमात्रवृत्तिरेव।

(प्रश्नाः)—स्नेहलक्षणस्य पदकृत्यं दर्शय। कस्मिन्द्रव्ये स्नेहो वर्त्तते? शब्दस्य किं लक्षणम्? कश्च तस्याश्रयः? तल्लक्षणे गुणपदनिवेशस्य किं फलम्?

स द्विविधः ध्वन्यात्मको वर्णात्मकश्चेति। ध्वन्यात्मको भेर्यादौ। वर्णात्मकः संस्कृतभाषादिरूपः।

शब्दं विभजते—"स" इति। ध्वन्यात्मकः=ध्वनिः आत्मा स्वरूपं यस्य सः। ध्वनित्वं जातिविशेषः ताल्वोष्ठपुटसंयोगजन्यः वर्णस्वरूप इत्यर्थः। 'भेर्यादा' विति—आदिना मृदङ्गादिपरिग्रहः।

इदन्तु बोध्यम्—स द्विविधोपि शब्दः पुनस्त्रिविधोऽपि भवति संयोगजो विभागजो शब्दजश्चेति। आद्यः—भेरीदण्डसंयोगजन्यो भाङ्कारादिशब्दः। अथवा करतालिकादिसंयोगजन्यस्तडतडादिशब्दः। द्वितीयः—वंशे पाट्यमाने दलद्वयविभागजन्यः पटपटादिशब्दः। तृतीयः—शब्दोत्पत्तिदेशमारभ्य कर्णरन्ध्रपर्यन्तं वीचीतरङ्गन्यायेन कदम्बमुकुलन्यायेन वा पवनवशात् या शब्दधारा जायते। तत्रोत्तरोत्तरशब्दं प्रति पूर्वः पूर्वः शब्दः कारणं, स "शब्दजः" शब्दो भवति।

(प्रश्नः)—कतिविधः शब्दः?।

सर्वव्यवहारहेतुर्ज्ञानं बुद्धिः। सा द्विविधा। स्मृतिरनुभवश्च। संस्कारमात्रजन्यं ज्ञानं स्मृतिः। तद्भिन्नं ज्ञानमनुभवः।

बुद्धेर्लक्षणमाह—"सर्वव्यवहारे" ति। व्यवहारः "घटः, पटः, जलं, दुग्धम्" इत्याकारकः शब्दप्रयोगः, सर्वे ये व्यवहारा आहारविहारादिरूपा अपि, तेषां

वैशेषिकसूत्रेणाकाशरूपद्रव्यविशेषस्यानुमानिकत्वेऽपि 'आकाश' इति संज्ञा आगमोपलब्धैव प्रयुक्ता। आगमेषु हि 'तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः, आकाशाद्वायुः, वायोरग्निः, अग्नेरापः, अद्भ्यः पृथिवी' इत्यादावकाशशब्दः श्रुत एवेति बोध्यम्।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

हेतुः=असाधारणं कारणं * बुद्धिरित्यर्थः। बुद्धिर्ज्ञानमिति समानार्थकौ शब्दौ। ज्ञानं विना शब्दप्रयोगासम्भवात्। "शब्दप्रयोगरूपव्यवहारहेतुत्वं" बुद्धेर्लक्षणमिति फलितम्। दण्डादिष्वतिव्याप्तिवारणाय "सर्वव्यवहार" इति। कालादावतिव्याप्तिवारणाय "असाधारण" इत्युक्तम्। बुद्धेर्विभागमाह—"से" ति। स्मृतेर्लक्षणमाह—"संस्कारे" ति। 'संस्कारजन्यत्वविशिष्टज्ञानत्वं' स्मृतेर्लक्षणमित्यर्थः। संस्कारो भावनाख्यः। संस्कारध्वंसे अतिव्याप्तिवारणाय 'ज्ञान' मित्युक्तम्। घटादिप्रत्यक्षे अतिव्याप्तिवारणाय 'संस्कारजन्य' मिति। प्रत्यभिज्ञायामतिव्याप्तिवारणाय "मात्र" पदम्। अनुभवस्य लक्षणमाह—"तद्भिन्न" मिति। 'स्मृतिभिन्नं ज्ञानमनुभव' इत्यनुभवस्य लक्षणमित्यर्थः। स्मृतावतिव्याप्तिवारणाय 'स्मृतिभिन्न' मित्युक्तम्। † सादृश्यादिज्ञानं संस्काराणामुद्बोधकम्। उद्बुद्धाश्च संस्काराः स्मृतिं जनयन्तीत्यपि ज्ञेयम्।

(प्रश्नाः)—बुद्धेः किं लक्षणम? तस्या लक्षणस्थपदानां किं किं प्रयोजनम्? स्मृतेर्लक्षणं ब्रूहि। अनुभवलक्षणस्यार्थं स्पष्टीकुरु।

स द्विविधः यथार्थोऽयथार्थश्च। ‡ तद्वति तत्प्रकारकोनुभवो यथार्थः। यथा रजते "इदं रजतम्" इति ज्ञानम्। सैव "प्रमा" इत्युच्यते। तदभाववति तत्प्रकारकोऽनुभवोऽयथार्थः। यथा शुक्तौ "इदं रजतम्" इतिज्ञानम्। सैव "अप्रमा" इत्युच्यते।

---

* "बुद्धिरर्थप्रकाशनम्" इति **तार्किकरक्षा**। मूले "सर्वव्यवहारहेतु" रिति—व्यवहारसामान्यहेतुरित्यर्थः। वाच्यतासम्बन्धेन समवायसम्बन्धेन वा ज्ञानस्य हेतुत्वाल्लक्षणसङ्गतिर्बोध्या।

† न्यायदर्शने तृतीयाध्यायस्य द्वितीयाह्निके प्रणिधानाद्या ये स्मृतिहेतव उक्तास्तेषामिहादिपदेन ग्रहणम्॥

‡ परं मूले तद्वतीति—सप्तम्यर्थो विशेष्यत्वमाश्रयतासम्बन्धेनानुभवान्वयि। तथा च-"तद्वद्विशेष्यकत्वे सति तत्प्रकारकानुभवत्वं" यथार्थानुभवलक्षणम्। तत्पदार्थः प्रकारः। तद्वत्त्वं प्रकारतावच्छेदकसम्बन्धेन ग्राह्यम्। तेन कालिकसम्बन्धेन शुक्त्यादौ रजतत्वसत्त्वेऽपि "इदं रजतम्" इति भ्रमे नातिव्याप्तिरित्याद्यधिकं नीलकण्ठ्यादौ द्रष्टव्यम्।

अत्र प्रामाण्यं प्रमा इति पर्यायशब्दौ। तत्र प्रामाण्यं 'तद्वति तत्प्रकारकानुभवत्वरूपं' प्रोक्तम्। तत्प्रामाण्यं ... नैयायिकानाम-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अनुभवं विभजते—"स द्विविध" इति । यथार्थानुभवस्य लक्षणमाह—'तद्वती' ति । "तत्" पदेन रजतादिधर्मिनिष्ठस्य रजतत्वादिधर्मस्य ग्रहणम् । तद्वति=तद्धर्मवति तत्प्रकारकः=स धर्म एव प्रकारो विशेषणं यत्र सः, अर्थात् रजतत्वधर्मवति रजते रजतत्वप्रकारकोऽनुभवः यथार्थानुभव इत्युच्यते । एवमेवान्यत्राप्यर्थो योजनीयः । इत्थञ्च * 'तद्वद्विशेष्यकत्वे सति तत्प्रकारकत्वं" यथार्थानुभवस्य लक्षणमुक्तं भवति । उदाहरति—"यथे" ति । पुरोवर्त्तिनि देशे स्थिते रजते यत् "इदं रजतम्" इत्याकारकं ज्ञानं स यथार्थानुभव इत्यर्थः । अस्यैव नामान्तरमाह—"सैवे" ति । यथार्थानुभव एव "प्रमा" इति पदेनाप्युच्यते । अयं भावः—"इदं रजतम्" इत्याकारके ज्ञाने रजतनिष्ठो रजतत्वं धर्मः प्रकारतारूपेण, रजतरूपो धर्मी विशेष्यतारूपेण च भासते, अत एवायमनुभवः "प्रमा" इत्युच्यते । अयथार्थानुभवेऽतिव्याप्तिवारणाय लक्षणे "तद्वति" इत्युक्तम् । निर्विकल्पकज्ञानेऽतिव्याप्तिनिरासाय "तत्प्रकारक" इत्युक्तम् । स्मृतिवारणाय "अनुभव" इति बोध्यम् ।

अयथार्थानुभवस्य लक्षणमाह—"तदभाववती" ति । तदभाववति=तद्धर्माभाववति, तत्प्रकारकः=तद्धर्मप्रकारकः अनुभवोऽयथार्थः । अन्यस्मिन्

---

* यत्र पुरोवर्त्तिनि रजते "इदं रजतम्" इत्याकारकं ज्ञानं जातं स यथार्थानुभवः । स एव लक्ष्यः । वर्त्तते च तत्रेदं लक्षणम् । तथाहि—तादृशज्ञाने त्रयो विषयाः सन्ति; विशेष्यः, प्रकारः, संसर्गश्चेति । तत्र—पुरोवर्त्ति रजतं विशेष्यः, रजतत्वं प्रकारः, समवायः संसर्गः । तथा च—तज्ज्ञानं रजतविशेष्यकम् रजतत्वप्रकारकं समवायसंसर्गकञ्च भवतीति । एवञ्चात्र तच्छब्देन प्रकारत्वोपलक्षितं रजतत्वं ग्राह्यम्, तद्वत् रजतम्, तच्चास्मिन् ज्ञाने विशेष्यम्, तत्=रजतत्वञ्चास्मिन् ज्ञाने प्रकार इति तद्वद्विशेष्यकत्वे सति तत्प्रकारकत्वे सति अनुभवत्वरूपलक्षणस्य "इदं रजतं" इत्याकारकयथार्थानुभवे विद्यमानत्वात् लक्षणसङ्गतिः ।

भिप्रेतं, किन्तु 'अप्रामाण्यं त्रिधा भिन्नं मिथ्यात्वाज्ञानसंशयैः' इति भट्टकुमारिलोक्तानां मिथ्याज्ञानसंदिग्धज्ञानापूर्ण (साकाङ्क्ष) ज्ञानानामप्रमाणत्वेन सङ्ग्रहाय अप्रामाण्यमपि दोषरूपं स्वतन्त्रमेव नैय्यायिकाभिप्रेतम्, अत एव अप्रामाण्यं दोषादुत्पद्यते इति नैय्यायिकसिद्धान्तः सङ्गच्छते । अप्रामाण्यस्य प्रामाण्यात्यन्ताभावरूपत्वे तु अत्यन्ताभावस्य नित्यत्वात् तस्य दोषजन्यत्वोक्तिर्न सङ्गच्छेत । प्रामाण्यं तु गुणादुत्पद्यते इति नैय्यायिकमतं प्रामाण्यस्य स्वत उत्पन्नत्व (ज्ञानसामग्रीमात्रजन्यत्व) वादिमीमांसकापेक्षया किञ्चिन्ध्रियते, तदत्र प्रपञ्चितमस्माभिः ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

वस्तुनि अन्यप्रकारा या प्रतीतिः स "अयथार्थानुभव" इत्यर्थः। उदाहरति—"यथा शुक्ता" विति। शुक्तिरूपे अन्यस्मिन् वस्तुनि "इदं रजतम्" इत्येवं रजतत्वप्रकारा या प्रतीतिःसाऽयथार्थोऽनुभवः। * "तदभाववद्विशेष्यकत्वे सति तत्प्रकारकत्वम्" इत्ययथार्थानुभवस्य लक्षणमिति फलितम्। अस्यैव नामान्तरमाह—"सैवे" ति। अयमेव (अयथार्थानुभव एव) "अप्रमा" इति कथ्यते। मिथ्याज्ञानमित्यर्थः। स्मृतावतिव्याप्तिवारणाय "अनुभव" इत्युक्तम्। यथार्थानुभवेऽतिव्याप्तिनिरासाय लक्षणे "तदभाववति" इत्युक्तम्। निर्विकल्पकज्ञानेऽतिव्याप्तिवारणाय 'तत्प्रकारक' इत्युक्तम् †। निर्विकल्पकस्य प्रकारतादिशून्यत्वादिति भावः॥

(प्रश्नाः)—कतिविधोऽनुभवः? यथार्थानुभवस्य किं लक्षणम्? तदुदाहरणेन स्पष्टीकुरु। अयथार्थानुभवस्य लक्षणं लिख। उदाहरणञ्च दर्शय। तत्तल्लक्षणस्य पदानां प्रयोजनं निरूप्यताम्।

यथार्थानुभवश्चतुर्विधः। प्रत्यक्षानुमित्युपमितिशब्दभेदात्। तत्कारणमपि चतुर्विधम्। प्रत्यक्षानुमानोपमानशब्दभेदात्।

यथार्थानुभवस्य विभागमाह—"यथार्थे"ति। प्रत्यक्षम्, अनुमितिः, उपमितिः, शब्द इत्येवं चतुर्विधमित्यर्थः। प्रसङ्गात्तत्करणं विभजते—"तत्करणमपी"ति। प्रमाकरणमित्यर्थः। "प्रमाकरणं प्रमाण" मिति प्रमाणसामान्यलक्षणमिति भावः। तत्र प्रत्यक्षप्रमाकरणं प्रत्यक्षं प्रमाणम्। अनुमितिप्रमा-

---

* यत्र पुरोवर्तिन्यां शुक्तौ "इदं रजतम्" इत्याकारकं ज्ञानं जातं सोऽयथार्थानुभवः स एव लक्ष्यः। वर्त्तते च तत्रेदं लक्षणम्। तथाहि—तादृशज्ञाने त्रयो विषयाः। विशेष्यः, प्रकारः, संसर्गश्चेति। तत्र पुरोवर्त्तिनी शुक्तिः विशेष्यः, रजतत्वं प्रकारः। समवायश्च संसर्गः। तथा च तज्ज्ञानं शुक्तिविशेष्यकं रजतत्वप्रकारकं समवायसंसर्गकञ्चेति। एवञ्चात्र तच्छब्देन प्रकारत्वोपलक्षित रजतत्वं ग्राह्यम्, तदभाववती शुक्तिः, सा चास्मिन् ज्ञाने विशेष्यरूपा। तत्=रजतत्वम्, तच्चास्मिन् ज्ञाने प्रकारः इति तदभाववद्विशेष्यकत्वे सति तत्प्रकारकत्वे सत्यनुभवत्वरूपलक्षणस्य शुक्तिविशेष्यके रजतत्वप्रकारके 'इदं रजतम्" इत्याकारकायथार्थानुभवे विद्यमानत्वाल्लक्षणसङ्गतिरिति बालोपयोगी मार्गो विवृतः॥

† "न प्रमा नापि भ्रमः स्यान्निर्विकल्पकम्" इति सिद्धान्ते तु निर्विकल्पकज्ञाने प्रमात्वभ्रमत्वयोरभावात्तस्यालक्ष्यत्वाल्लक्षणसमन्वयाभावेऽपि न क्षतिरित्येष तत्त्वमिति केचित्॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

करणमनुमानं प्रमाणम् । उपमितिप्रमाकरणमुपमानं प्रमाणम् । शाब्दीप्रमा-करणं शब्दः प्रमाणम् इति भेदात् ।

(प्रश्नौ)—यथार्थानुभवस्य लक्षण सभेदं निरूपय । प्रमाणस्य किं लक्षणं कतिविधञ्च तत ? ।

व्यापारवदसाधारणं कारणं करणम् । कार्यनियतपूर्व-वृत्ति कारणम् । * कार्यं प्रागभावप्रतियोगि ।

तत्करणमित्युक्तं तत्र किं करणमिति जिज्ञासाया करणलक्षणमाह— "व्यापारवदि" ति । तज्जन्यत्वे सति तज्जन्यजनको व्यापारः । यथा कुठारजन्यत्वे सति कुठारजन्यायाः छिदाया जनकः कुठारदारुसंयोगो व्यापारः । तादृशव्या-पारवद्यदसाधारण कारणं (कुठारः) तदेव "करण" मित्यर्थः । (अथवा) यथा घटं प्रति कपालद्वयं करणम् । कपालद्वयसंयोगे सति घट उत्पद्यते । अतः कपालद्वयसंयोगो व्यापारः । तादृशव्यापारवदसाधारणं कारणं कपालद्वयम्, अतएव तत्करणमिति शक्यते वक्तुम् । कालादावतिव्याप्तिवारणाय लक्षणे "असाधारण" मित्युक्तम् । व्यापारेऽतिव्याप्तिवारणाय "व्यापारवद्" इत्युक्तम् ।

प्रसङ्गेन कारणं लक्षयति—"कार्यनियते" ति । कार्यात् नियता=अवश्य-म्भाविनी पूर्ववृत्तिः पूर्ववर्त्तनं यस्य तत् कार्यनियतपूर्ववृत्ति, अर्थात् यस्मिन् क्षणे कार्यमुत्पद्यते तत्क्षणात्पूर्वस्मिन् कार्योत्पादनार्थे यन्नियमेन भवति तदेव कारणं ज्ञेयम् । "कार्यम्प्रति नियतत्वे सति पूर्ववृत्तित्वं कारणत्व" मिति लक्षणं फलितम् । अनियते रासभादावतिव्याप्तिवारणाय लक्षणे "नियत" इति पदनिवेशः । कार्यवारणाय "पूर्वेति" । दण्डत्वादावतिव्याप्तिवारणाय लक्षणे "अनन्यथासिद्धे" ति पदमपि निवेश्यम् । अवश्यक्लृप्तपूर्ववर्त्तिन एव कार्यसम्भवे तत्सहभूतमन्यथासिद्धम् । यथा तादृशं कारणं दण्डादि तत्सह-भूतं दण्डत्वादि, दण्डेनैव घटरूपकार्यसम्भवे तत्सहभूतं दण्डत्वादिकमन्यथा-सिद्धम् । न अन्यथासिद्धमनन्यथासिद्धम् । वयन्तु "नियत"पदेनैव सर्वक्लेश-निवृत्तिं मन्यामहे । साधारणासाधारणभेदात् कारणं द्विविधम् । ईश्वरः, तस्य ज्ञानेच्छाकृतयः, दिशा, कालः, अदृष्टम्, प्रागभावः, प्रतिबन्धकाभावः, एते नव साधारणकारणपदेनोच्यन्ते । कार्यमात्रं प्रति ईश्वरादीनां नियत-पूर्ववर्त्तित्वात्, एतद्भिन्नं तस्य तस्य कार्यस्य तत्तत्कारणमसाधारणं कारणं बोध्यम् । कार्यस्य लक्षणमाह—"कार्यं" मिति । यदा घटादिकार्यमुत्पद्यते तस्योत्पत्तेः पूर्वं "इह कपाले घटो भविष्यति" "इह तन्तुषु पटो भविष्यति" इत्याद्याकारा या प्रतीतिर्जायते तस्याः प्रतीतेर्विषयो योऽभावः—स "प्राग-भाव" इत्युच्यते, तस्य यत्प्रतियोगि=विरोधि घटादिकं तदेव "कार्यं" पद-

* जन्यस्यैव प्रागभावो विद्यते न नित्यस्य, अतः कार्यमेव प्रागभावप्रति-योगीत्यर्थः ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

वाच्यमिति भावः । कालादावतिव्याप्तिवारणाय "प्राग्" इति पदं दत्तम् । असम्भवदोषवारणाय "प्रतियोगि" इत्युक्तम् ।

(प्रश्नाः)—कारणस्य किं लक्षणम् ? व्यापारश्च कः ? कारणस्य लक्षणमुच्यताम् । तद्भेदाश्च प्रदर्शनीयाः । कार्यलक्षणं सपदकृत्यं लिख्यताम् ।

कारणं त्रिविधम् । समवाय्यसमवायिनिमित्तभेदात् । यत्समवेतं कार्यमुत्पद्यते तत्समवायिकारणम् । यथा तन्तवः पटस्य, पटश्च स्वगतरूपादेः । कार्येण कारणेन वा सहैकस्मिन्नर्थे समवेतत्वे सति कारणमसमवायिकारणम् । यथा—तन्तुसंयोगः पटस्य । तन्तुरूपं पटरूपस्य । तदुभयभिन्नं कारणं निमित्तकारणम्, यथा तुरीवेमादिकं पटस्य ।

प्रसङ्गात् कारणस्य विभागमाह—"कारणं त्रिविध" मिति । समवायिकारणम्, असमवायिकारणम्, निमित्तकारणञ्चेति । समवायिकारणस्य लक्षणमाह—"यत्समवेत" मिति । यस्मिन्समवेतं = समवायसम्बन्धेन वर्त्तमानं सत् कार्यमुत्पद्यते तत्समवायिकारणमित्यर्थः । उदाहरणद्वारा स्पष्टयति—"यथा" इति । तन्तुषु समवायेन सम्बद्धं सत् पटात्मकं कार्यमुत्पद्यत इति तन्तवः पटस्य

कारणेनेति । यत्कार्यनिरूपितम् असमवायिकारणत्वं लक्षणीयं, तत्कार्यनिरूपितं समवायिकारणमिह कारणशब्देन विवक्षितमिति बोध्यम् । अयं च कार्यैकार्थप्रत्यासत्त्याऽऽसन्नं, कारणैकार्थप्रत्यासत्त्या चाऽऽसन्नमिति द्विविधमसमवायिकारणं भवतीति विभागः कणादाचार्यैः 'रूपाणां रूपम्' (अ० १ आ० १ सू० २८) इति सूत्रे सूचितः । तत्सूत्रे भाष्ये टीकादौ च स्पष्टीकृत इति बोध्यम् ।

समवायिकारणत्वं द्रव्यस्यैव भवति, नतु गुणकर्मादीनाम् । असमवायिकारणत्वं तु गुणकर्मणोरेव सम्भवति, न तु द्रव्यस्य, नापि सामान्यादेः इति नियमो बोध्यः । तदुक्तम्—विश्वनाथपञ्चाननेन

'समवायिकारणत्वं द्रव्यस्यैवेति विज्ञेयम् ।
गुणकर्ममात्रवृत्ति ज्ञेयमथाप्यसमवायिहेतुत्वम्' ॥

इति कारिकावली का० २३ ।

निमित्तकारणत्वं तु यथाप्रसङ्गं द्रव्यस्य, गुणकर्मणोः, सामान्यादीनां च सम्भवतीति बोध्यम् ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

समवायिकारणम् । यथा वा कपालेषु समवायेन सम्बद्धं सत् घटात्मकं कार्यमुत्पद्यते इति कपालानि घटस्य समवायिकारणम् । "पटश्चे" ति । पटे समवायेन सत् पटगतं रूपमुत्पद्यत इति * रूपं प्रति पटः समवायिकारणमित्यादि अन्यदप्यूह्यम् । दण्डचक्रादिष्वतिव्याप्तिवारणाय लक्षणे 'समवेत' मिति पदं दत्तम् ।

असमवायिकारणस्य लक्षणमाह—'कार्येणे' ति । द्विविधमसमवायिकारणम् । तद्यथा—कार्येण सहैकस्मिन्नर्थे समवेतं सत् यत्कारणं तदसमवायिकारणमित्येकम् । कारणेन सह एकस्मिन्नर्थे समवेतं सत् यत्कारणं तदसमवायिकारणमित्यपरम् । आद्यमुदाहरति—"यथा तन्तुसंयोग" इति । पटात्मककार्येण सह एकस्मिन् अर्थे = तन्तौ समवेतं=समवायसम्बन्धेन वर्त्तमानं सत् तन्तुसंयोगात्मकं कारणं पटकार्यं प्रति असमवायिकारणम् । सर्वत्र कार्यद्रव्ये अवयवसंयोगोऽसमवायिकारणमिति सिद्धान्तः । द्वितीयं दर्शयति—"यथा तन्तुरूप पटरूपस्ये" ति । अस्यायमाशयः—पटगतरूपं प्रति कारणं पटः, तेन कारणीभूतेन पटेन सह एकस्मिन्तन्तुरूपेऽर्थे समवेतं=समवायसम्बन्धेन वर्त्तमानं सत् तन्तुगतं रूपं पटगतरूपं प्रति कारणं भवति, अतः तन्तुरूपं पटगतरूपस्य असमवायिकारणम्, इदं द्वितीयम् ।

निमित्तकारणस्य लक्षणमाह—"तदुभयभिन्न" मिति । समवाय्यसमवायिकारणभिन्नं कारणं निमित्तकारणमित्यर्थः । उदाहरति—"यथे" ति । आदिना कुलालादिपरिग्रहः ।

(प्रश्नौ)—कतिविधं कारणम् ? समवाय्यादिकारणानां लक्षणानि सोदाहरणं स्पष्टं कुरु ।

तदेतत्–त्रिविधकारणमध्ये यदसाधारणं कारणं तदेव करणम् ।

(क) कारणस्वरूपमुक्त्वा तद्विशेषकरणस्वरूपमुपसंहरति "तदेत" दिति । अनुपदलक्षितं यत् त्रिविधं कारणं तन्मध्ये यद् असाधारणं = व्यापारसम्बन्धावच्छिन्नं कारणं तदेव "करण" मित्युच्यते । † फलायोगव्यवच्छिन्नं कारणं करणमिति मते तु व्यापारस्यैव करणत्वम् ।

तत्र प्रत्यक्षज्ञानकरणं प्रत्यक्षम् । इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षम् ।

षड्विधेन्द्रियरूपप्रत्यक्षप्रमाणस्य लक्षणमाह—"प्रत्यक्षे" ति । तत्र= प्रमाणचतुष्टयमध्ये । प्रत्यक्षं = चाक्षुषादिप्रत्यक्षात्मकं यज्ज्ञानं प्रमारूपं तस्य

---

* रूपात्मककार्यम्प्रति ।

† यत्सत्त्वेऽव्यवहितोत्तरक्षण एव कार्यञ्जायते तत्करणमिति प्राचामाशयः ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

करणं=व्यापारवदसाधारणं कारणं इन्द्रियं चक्षुरादि, तदेव प्रत्यक्षप्रमाणमित्यर्थः। "प्रत्यक्षज्ञानकरणत्वं" प्रत्यक्षस्य लक्षणम्। प्रत्यक्षप्रमाणस्य लक्षणं दर्शितं सम्प्रति तज्जन्यस्य प्रत्यक्षज्ञानस्य फलरूपस्य लक्षणमाह—"इन्द्रियार्थे" ति। इन्द्रियं=चक्षुरादि, अर्थः-घटादिः तयोः सन्निकर्षेण=संयोगादिसम्बन्धविशेषेण (वक्ष्यमाणेन सन्निकर्षरूपेण), जन्यं यज्ज्ञानं तत्प्रत्यक्षं प्रमारूपं प्रत्यक्षप्रमाणस्य फलमित्यर्थः। यत्र तु काचाद्युपनेत्रव्यवधानेऽपि घटादिपदार्थप्रत्यक्षं तत्र स्वच्छद्रव्यस्य तेजोऽनिरोधकत्वेन तदन्तश्चक्षुषः प्रवेशसम्भवात् प्रत्यक्षहेतुसन्निकर्षस्य नानुपपत्तिः।

ननु—कथं "दर्पणे मुखम्" इति प्रतीतिः? उच्यते—दर्पणप्राप्तं चक्षुरिन्द्रियं परावृत्त्य मुखं प्राप्य प्रत्यक्षं जनयति। कचित् स्वच्छद्रव्यस्यैव दोषवशादन्यथाभानमिति "दर्पणे मुखम्" इति धीस्तु भ्रम एवेति प्रपञ्चो मत्प्रणीतायां वेदान्ततत्त्वसमीक्षायां वेदान्तपरिभाषाप्रभायां वा द्रष्टव्यः। सन्निकर्षध्वंसेऽतिव्याप्तिवारणाय "इन्द्रियार्थसन्निकर्षे" ति। इदञ्च जन्यप्रत्यक्षस्यैव लक्षणम्, अतः ईश्वरप्रत्यक्षे नाव्याप्तिः।

(प्रश्नाः)—प्रत्यक्षप्रमाणस्य किं लक्षणम्? लक्षणग्रन्थस्य चार्थं स्पष्टीकुरु। प्रत्यक्षप्रमायाः लक्षणं ब्रूहि।

तद् द्विविधं निर्विकल्पकं सविकल्पकञ्च। तत्र निष्प्रकारकं ज्ञानं निर्विकल्पकम्। यथेदं किञ्चित्। सप्रकारकं ज्ञानं सविकल्पकम्, यथा डित्थोयं, ब्राह्मणोयं, श्यामोयमिति।

प्रत्यक्षं विभजते—"तद्द्विविध" मिति। तत्र=तयोर्मध्ये। निर्विकल्पकस्य लक्षणमाह—"निष्प्रकारक" मिति। प्रकारत्वानिरूपकमित्यर्थः। "विशेषणविशेष्यसम्बन्धाविषयकं ज्ञानं निर्विकल्पक" मिति सारः। उदाहरति—"यथेद" मिति। दूरादालोचिते वस्तुनि यत् "इदं किञ्चित्" इत्याकारकं ज्ञानं तत् * निर्विकल्पकम्। सविकल्पके अतिव्याप्तिवारणाय "निष्प्रकारक" मिति।

---

* नृसिंहभट्टगुरवो बालकृष्णतर्कालङ्कारास्तु—विलक्षणविषयताशालित्वमेव निर्विकल्पकत्वमूचिरे। निर्विकल्पके चतुर्थी विषयता स्वीक्रियते किन्तु प्रकारतारूपा, विशेष्यतारूपा, संसर्गतारूपा चैतद् त्रिविधविषयतामध्ये निर्विकल्पे

निर्विकल्पकमिति। विकल्पो—विशेषणविशेष्यभावः, तस्मान्निर्गतं निर्विकल्पकम्। एतेन विशेषणविशेष्यभावानवगाहि ज्ञानं निर्विकल्पकमिति सिद्धम्। निर्विकल्पकज्ञानस्य स्वरूपं तु कुमारिलभट्टपादैरुक्तं श्लोकवार्तिके—

अस्ति ह्यालोचनं ज्ञानं प्रथमं निर्विकल्पकम्।
बालमूकादिविज्ञानसदृशं शुद्धवस्तुजम्॥ इति मी० खं०।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

प्रकारतावारणाय "ज्ञान" मिति । सविकल्पकस्य लक्षणमाह—"सप्रकारक" मिति । प्रकारो नाम जात्यादिरूपो विशेषः, तेन सह वर्त्तते इति * सप्रकारकम् । नामजात्यादिविशेषणसम्बन्धविषयकं ज्ञानं सविकल्पकमिति फलितं लक्षणम् । उदाहरति—'यथा डित्थ' इति । काष्ठमयहस्तिनो डित्थसञ्ज्ञा । 'डित्थोऽयं ब्राह्मणोऽय' मित्यादिज्ञानं नामजात्यादिसम्बन्धविषयकम्, अतः सविकल्पकमुच्यते । घटादावतिव्याप्तिवारणाय 'ज्ञानम्' इत्युक्तम् । निर्विकल्पकेऽतिव्याप्तिनिरासाय 'सप्रकारक' मित्युक्तम् ।

(प्रश्नः)—प्रत्यक्षज्ञानस्य भेदः सप्रपञ्चो निरूपणीयः ।

प्रत्यक्षज्ञानहेतुरिन्द्रियार्थसन्निकर्षः षड्विधः । संयोगः, संयुक्तसमवायः, संयुक्तसमवेतसमवायः, समवायः, समवेतसमवायः, विशेषणविशेष्यभावश्चेति ॥

प्रत्यक्षज्ञानकारणीभूतस्य इन्द्रियार्थसन्निकर्षस्य विभागमाह—"प्रत्यक्षज्ञानहेतु" रिति । स्पष्टमन्यत् ।

(प्रश्नः)—कतिविधः सन्निकर्षः ?

चक्षुषा घटप्रत्यक्षजनने संयोगः सन्निकर्षः । घटरूपप्रत्यक्षजनने संयुक्तसमवायः सन्निकर्षः । चक्षुःसंयुक्ते घटे रूपस्य समवायात् । रूपत्वसामान्यप्रत्यक्षे संयुक्तसमवेतसमवायः सन्निकर्षः । चक्षुःसंयुक्ते घटे रूपं समवेतं तत्र रूपत्वस्य समवायात् । श्रोत्रेण शब्दसाक्षात्कारे समवायः

कापि विषयता नास्तीति परेषां सिद्धान्तोऽपि फलतस्तर्कालङ्कारानुरोध्येव । प्रपञ्चो मदीयग्रन्थान्तरे ।

* विषयताया ज्ञाननिरूपितत्वात् ज्ञानस्य विषयतानिरूपकत्वेन "प्रकारतानिरूपकज्ञानत्वं सविकल्पकलक्षणमित्याशयः ।

षड्विध इति । अत्र केवलं लौकिकः सन्निकर्ष उक्तः । अलौकिकोऽपि सन्निकर्षस्त्रिविधोऽस्ति—ज्ञानलक्षणः, सामान्यलक्षणो, योगज श्चेति । तदुक्तं विश्वनाथपञ्चाननेन—

अलौकिकस्तु व्यापारस्त्रिविधः परिकीर्तितः ।
सामान्यलक्षणो ज्ञानलक्षणो योगज स्त्रिधा ॥ इति ।

इह तु अलौकिकसन्निकर्षः सूक्ष्मत्वान्नोक्त इति बोध्यम् ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

करणं=व्यापारवदसाधारणं कारणं इन्द्रियं चक्षुरादि, तदेव प्रत्यक्षप्रमाण-मित्यर्थः। "प्रत्यक्षज्ञानकरणत्वं" प्रत्यक्षस्य लक्षणम्। प्रत्यक्षप्रमाणस्य लक्षणं दर्शितं सम्प्रति तज्जन्यस्य प्रत्यक्षज्ञानस्य फलरूपस्य लक्षणमाह—"इन्द्रियार्थे" ति। इन्द्रियं=चक्षुरादि, अर्थः-घटादिः तयोः सन्निकर्षेण=संयोगादिसम्बन्ध-विशेषेण (वक्ष्यमाणेन सन्निकर्षरूपेण), जन्यं यज्ज्ञानं तत्प्रत्यक्षं प्रमारूपं प्रत्य-क्षप्रमाणस्य फलमित्यर्थः। यत्र तु काचाद्युपनेत्रव्यवधानेऽपि घटादिपदार्थ-प्रत्यक्षं तत्र स्वच्छद्रव्यस्य तेजोऽनिरोधकत्वेन तदन्तश्चक्षुषः प्रवेशसम्भवात् प्रत्यक्षहेतुसन्निकर्षस्य नानुपपत्तिः।

ननु—कथं "दर्पणे मुखम्" इति प्रतीतिः? उच्यते—दर्पणप्राप्तं चक्षु-रिन्द्रियं परावृत्य मुखं प्राप्य प्रत्यक्षं जनयति। क्वचित् स्वच्छद्रव्यस्यैव दोष-वशादन्यथाभानमिति "दर्पणे मुखम्" इति धीस्तु भ्रम एवेति प्रपञ्चो मत्प्रणी-तायां वेदान्ततत्त्वसमीक्षायां वेदान्तपरिभाषाप्रभायां वा द्रष्टव्यः। सन्निकर्षध्वंसेऽति-व्याप्तिवारणाय "इन्द्रियार्थसन्निकर्षे" ति। इदञ्च जन्यप्रत्यक्षस्यैव लक्षणम्, अतः ईश्वरप्रत्यक्षे नाव्याप्तिः।

(प्रश्नाः)—प्रत्यक्षप्रमाणस्य किं लक्षणम्? लक्षणग्रन्थस्य चार्थं स्पष्टीकुरु। प्रत्यक्षप्रमायाः लक्षणं ब्रूहि।

तद् द्विविधं निर्विकल्पकं सविकल्पकञ्च। तत्र निष्प्र-कारकं ज्ञानं निर्विकल्पकम्। यथेदं किञ्चित्। सप्रकारकं ज्ञानं सविकल्पकम्, यथा डित्थोयं, ब्राह्मणोयं, श्यामोयमिति।

प्रत्यक्षं विभजते—"तद्द्विविध" मिति। तत्र=तयोर्मध्ये। निर्विकल्प-कस्य लक्षणमाह—"निष्प्रकारक" मिति। प्रकारत्वानिरूपकमित्यर्थः। "विशेष-णविशेष्यसम्बन्धाविषयकं ज्ञानं निर्विकल्पक" मिति सारः। उदाहरति—"यथेद" मिति। दूरादालोचिते वस्तुनि यत् "इदं किञ्चित्" इत्याकारकं ज्ञानं तत् * निर्विकल्पकम्। सविकल्पके अतिव्याप्तिवारणाय "निष्प्रकारक" मिति।

* नृसिंहभट्टगुरवो बालकृष्णतर्कालङ्कारास्तु—विलक्षणविषयताशालित्व-मेव निर्विकल्पकत्वमूचिरे। निर्विकल्पके चतुर्थी विषयता स्वीक्रियते किन्तु प्रकारतारूपा, विशेष्यतारूपा, संसर्गतारूपा चैतद् त्रिविधविषयतामध्ये निर्विकल्पे

निर्विकल्पकमिति। विकल्पो—विशेषणविशेष्यभावः, तस्मान्निर्गतं निर्वि-कल्पकम्। एतेन विशेषणविशेष्यभावानवगाहि ज्ञानं निर्विकल्पकमिति सिद्धम्। निर्विकल्पकज्ञानस्य स्वरूपं तु कुमारिलभट्टपादैरुक्तं श्लोकवार्तिके—

अस्ति ह्यालोचनं ज्ञानं प्रथमं निर्विकल्पकम्।

बालमूकादिविज्ञानसदृशं शुद्धवस्तुजम्॥ इति। प्र० खं०।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

प्रकारतावारणाय "ज्ञान" मिति । सविकल्पकस्य लक्षणमाह—"सप्रकारक" मिति । प्रकारो नाम जात्यादिरूपो विशेषः, तेन सह वर्त्तते इति * सप्रकारकम् । नामजात्यादिविशेषणसम्बन्धविषयकं ज्ञानं सविकल्पकमिति फलितं लक्षणम् । उदाहरति—'यथा डित्थ' इति । काष्ठमयहस्तिनो डित्थसञ्ज्ञा । 'डित्थोऽयं ब्राह्मणोऽय' मित्यादिज्ञानं नामजात्यादिसम्बन्धविषयकम्, अतः सविकल्पकमुच्यते । घटादावतिव्याप्तिवारणाय 'ज्ञानम्' इत्युक्तम् । निर्विकल्पकेऽतिव्याप्तिनिरासाय 'सप्रकारक' मित्युक्तम् ।

(प्रश्नः)—प्रत्यक्षज्ञानस्य भेदः सप्रपञ्चो निरूपणीयः ।

प्रत्यक्षज्ञानहेतुरिन्द्रियार्थसन्निकर्षः षड्विधः । संयोगः, संयुक्तसमवायः, संयुक्तसमवेतसमवायः, समवायः, समवेतसमवायः, विशेषणविशेष्यभावश्चेति ॥

प्रत्यक्षज्ञानकारणीभूतस्य इन्द्रियार्थसन्निकर्षस्य विभागमाह—"प्रत्यक्षज्ञानहेतु" रिति । स्पष्टमन्यत् ।

(प्रश्नः)—कतिविधः सन्निकर्षः ?

चक्षुषा घटप्रत्यक्षजनने संयोगः सन्निकर्षः । घटरूपप्रत्यक्षजनने संयुक्तसमवायः सन्निकर्षः । चक्षुःसंयुक्ते घटे रूपस्य समवायात् । रूपत्वसामान्यप्रत्यक्षे संयुक्तसमवेतसमवायः सन्निकर्षः । चक्षुःसंयुक्ते घटे रूपं समवेतं तत्र रूपत्वस्य समवायात् । श्रोत्रेण शब्दसाक्षात्कारे समवायः

क्वापि विषयता नास्तीति परेषां सिद्धान्तोऽपि फलतस्तर्कालङ्कारानुरोध्येव । प्रपञ्चो मदीयग्रन्थान्तरे ।

* विषयताया ज्ञाननिरूपितत्वात् ज्ञानस्य विषयतानिरूपकत्वेन "प्रकारतानिरूपकज्ञानत्वं सविकल्पकलक्षण"मित्याशयः ।

षड्विध इति । अत्र केवलं लौकिकः सन्निकर्ष उक्तः । अलौकिकोऽपि सन्निकर्षस्त्रिविधोऽस्ति—ज्ञानलक्षणः, सामान्यलक्षणो, योगज श्चेति । तदुक्तं विश्वनाथपञ्चाननेन—

अलौकिकस्तु व्यापारस्त्रिविधः परिकीर्तितः ।
सामान्यलक्षणो ज्ञानलक्षणो योगज स्त्रिधा ॥ इति ।

इह तु अलौकिकसन्निकर्षः सूक्ष्मत्वान्नोक्त इति बोध्यम् ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

सन्निकर्षः। कर्णविवरवर्त्त्याकाशस्य श्रोत्रत्वाच्छब्दस्याकाशगुणत्वात् गुणगुणिनोश्च समवायात्। शब्दत्वसाक्षात्कारे समवेतसमवायः सन्निकर्षः। श्रोत्रसमवेते शब्दे शब्दत्वस्य समवायात्। अभावप्रत्यक्षे विशेषणविशेष्यभावः सन्निकर्षः 'घटाभाववद्भूतलम्' इत्यत्र चक्षुःसंयुक्ते भूतले घटाभावस्य विशेषणत्वात्। एवं सन्निकर्षषट्कजन्यं ज्ञानं प्रत्यक्षम्, तत्करणमिन्द्रियम्। तस्मादिन्द्रियं प्रत्यक्षप्रमाणमिति सिद्धम्।

संयोगासन्निकर्षस्योदाहरणमाह—"चक्षुषे" ति। द्रव्यमात्रप्रत्यक्षे सर्वत्र संयोगः सन्निकर्ष इत्यर्थः, 'द्रव्ययोरेव संयोगः' इति नियमात्। अत्रेदं बोध्यम्—आत्मसंयुक्तं मन इन्द्रियेण संयुज्यते, मनः संयुक्तमिन्द्रियमर्थेन संयुज्यते, ततः प्रत्यक्षज्ञानमुत्पद्यते। संयुक्तसमवायस्य द्वितीयसन्निकर्षस्योदाहरणमाह—'संयुक्तसमवाय' इति। तत्र युक्तिमाह—'चक्षुःसंयुक्त' इति। संयुक्तसमवेतसमवायमुदाहरति—"रूपत्वे" ति। समवायसन्निकर्षमुदाहरति 'श्रोत्रेणे' ति। कर्णशष्कुल्यवच्छिन्नं नभः श्रोत्रम्। अत्र युक्तिमाह—'कर्णे' ति। दूरस्थशब्दस्य ग्रहणन्तु—वीचीतरङ्गन्यायेन कदम्बमुकुलन्यायेनेति प्रागुक्तम्। समवेतसमवायसन्निकर्षमुदाहरति 'शब्दत्वे' ति। विशेषणविशेष्यभावं षष्ठं सन्निकर्षमुदाहरति—'अभावे' ति। अत्र युक्तिमाह 'घटाभाववदि' ति। यदा 'घटाभाववद्भूतलम्' इति प्रतीतिर्जायते तदा घटाभावो विशेषणं, भूतलं विशेष्यम्।

अभावप्रत्यक्षे इति। एवं समवायस्य प्रत्यक्षेऽपि विशेषणविशेष्यभावः सन्निकर्षो बोध्यः। अभावप्रत्यक्षे तु 'येनेन्द्रियेण यद्गृह्यते तन्निष्ठा जातिः तदभावश्च तेनेन्द्रियेण गृह्यते इति नियमात् प्रतियोगिप्रत्यक्षे यदिन्द्रियमुपयुज्यते तदेवेन्द्रियं तत्प्रतियोगिकाऽभाव प्रत्यक्षे उपयुज्यते इति नियमः। यथा रूपाभावः चक्षुषा गृह्यते, गन्धाभावो घ्राणेनेत्यादि। सन्निकर्षस्तु अभावेन सह विशेषणतैव, संयोगसमवायादेरसम्भवात्। द्रव्यद्रव्ययोरेव संयोग इति नियमात्। गुणगुणिनोः क्रियाक्रियावतोः, जातिव्यक्त्योः, अवयवावयविनोः नित्यद्रव्यविशेषयोरेव च समवाय इति नियमात्। किञ्च अभावप्रत्यक्षे योग्यानुपलब्धिरपि कारणम्, अत एवान्धकारे घटप्रत्यक्षं न सम्भवतीति सङ्क्षेपः।

CC-0. In Public Domain. Funding by IKS-MoE

इति प्रत्यक्षपरिच्छेदः।

Digitized by eGangotri and Sarayu Trust.

यदा "भूतले घटो नास्ति" इति प्रतीतिर्भवति तदा भूतलं विशेषणं घटाभावो विशेष्य इति विशेषो बोध्यः । *

इदन्तु बोध्यम्—द्रव्यग्राहकाणि त्रीणीन्द्रियाणि चक्षुः, त्वक्, मनश्चेति । आद्ये द्वे बाह्यद्रव्यग्राहके । मनस्तु आत्मरूपस्यान्तरद्रव्यस्य ग्राहकम् । अन्यच्च समवायस्य नित्यत्वेन शब्दप्रत्यक्षे को व्यापार इति यदि प्रश्नः स्यात् तदा 'श्रोत्रमनः संयोगः सन्निकर्ष' इत्युत्तरं देयम् ।

(प्रश्नः)—सन्निकर्षस्य भेदान्सोदाहरणान्प्रपञ्चय ।

इति प्रत्यक्षपरिच्छेदः ।

अनुमितिकरणमनुमानम् । परामर्शजन्यं ज्ञानमनुमितिः । व्याप्तिविशिष्टपक्षधर्मताज्ञानं परामर्शः । "वह्निव्याप्यधूमवानयं पर्वत" इति ज्ञानं परामर्शः । तज्जन्यं "पर्वतो वह्निमान्" इति ज्ञानमनुमितिः ॥

कार्यकारणभावसङ्गत्या † प्रत्यक्षानन्तरमनुमाननिरूपणं प्रारभते । नहि धूमादिप्रत्यक्षज्ञानं विना अप्रत्यक्षस्य वह्न्यादेरनुमितिर्भवति, तस्माद् धूमादिप्रत्यक्षं कारणं, वह्न्यादेरनुमितिज्ञानं कार्यमिति भावः । अनुमानं लक्षयति—'अनुमिती' ति । अनुमितेः करणम्=साधकतमं यत् तद् 'अनुमानं'

---

* सप्तम्यन्तस्य विशेषणत्वनियमादिति भावः ।

† आनन्तर्याभिधानप्रयोजको धर्मः सङ्गतिः । स च षोढा—

सप्रसङ्ग उपोद्घातो हेतुताऽवसरस्तथा ।
निर्वाहकैक्यकार्यैक्ये षोढा सङ्गतिरिष्यते ॥ इति

प्रपञ्चोऽस्मन्मुक्तावलीप्रभायामनुसन्धेयः ।

अथानुमानपरिच्छेदः ।

अनुमितिकरणमनुमानमिति । अत्र अनुमिति शब्दो भावे क्तिन्प्रत्ययान्तः । अनुमानशब्दश्च करणे ल्युडन्तो, नतु भावे ल्युडन्तः । तेन फलीभूतं ज्ञानमनुमितिरित्युच्यते, साधनीभूतं ज्ञानमनुमानमित्युच्यते इति भेदः पर्यवसन्नः । एवं च अनुमानपदेन व्याप्तिज्ञानमुच्यते, तदेवानुमितौ करणमित्युच्यते, परामर्शो व्याप्तिज्ञानरूपकरणस्य व्यापारस्थानीयो भवति । व्याप्तिज्ञानस्य च भूयोदर्शनादिप्रत्यक्षरूपमानोत्तरं व्याप्रियमाणत्वादनुमानपदवाच्यता युक्तैव ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

प्रमाणमित्यर्थः। कुठारादावतिव्याप्तिवारणाय "अनुमिती" ति। प्रत्यक्षादावतिव्याप्तिवारणाय 'अनुमान' मिति। अनुमितेर्लक्षणमाह 'परामर्श' ति। 'डुमिञ्' प्रक्षेपणे इत्यस्माद्धातोः स्त्रियां भावे क्तिन्। अनु=प्रत्यक्षादितः पश्चान्मीयते इति 'अनुमितिः'। एवमेव अनुमीयते ज्ञायते इन्द्रियागोचरो वह्न्यादिरनेनेति करणार्थे ल्युट्प्रत्यये कृते सति 'अनुमान' पदसिद्धिर्बोध्या। परामर्शेण—वक्ष्यमाणलक्षणेन जन्यं यज्ज्ञानं सा अनुमितिः=अनुमितिपदवाच्यं अनुमानप्रमाणजन्यं ज्ञानम्। "परामर्शजन्यत्वविशिष्टं ज्ञानमनुमिति'रिति लक्षणं फलितम्। ज्ञानमात्रोपादानेन प्रत्यक्षादावतिव्याप्तिः स्यात्, तद्वारणाय "परामर्शजन्यत्वविशिष्ट" मित्युक्तम्। तावन्मात्रोक्तौ परामर्शजन्यध्वंसेऽतिव्याप्तिः स्यात्, अतो 'ज्ञान' मित्युक्तम्।

उपोद्घातसङ्गत्या परामर्शस्य लक्षणमाह—"व्याप्ती" ति। व्याप्तिविशिष्टं=व्याप्तिविषयकं तत् पक्षधर्मताज्ञानं—पक्षः पर्वतादिः तद्वृत्तित्वज्ञानम् अर्थात् तादृशधूमादिविशिष्टपक्षविषयकं ज्ञानं स परामर्श इत्यर्थः। परामर्शमभिलाप्य दर्शयति—'यथे' ति। वह्निव्याप्यः=वह्निनिरूपितव्याप्त्याश्रयो यो धूमः तादृशधूमवानयं पर्वत इति—इत्याकारकं यज्ज्ञानं स परामर्शः=परामर्शस्याकार इत्यर्थः। अनुमितिमभिलाप्य दर्शयति—"तज्जन्य" मिति। तज्जन्यम्=उक्तपरामर्शनामकज्ञानजन्यं यत् "पर्वतो वह्निमान्" इत्याकारकं ज्ञानं तदेव अनुमितिः=अनुमानप्रमाणजन्यं प्रमारूपं फलमित्यर्थः।

अनुमितौ व्याप्तिज्ञानं करणम्, परामर्शो व्यापारः अनुमितिः फलमिति भावः।

(प्रश्नाः)—अनुमानस्य किं लक्षणम्? अनुमितिलक्षणं सपदकृत्यं ब्रूहि। अनुमानानुमितिपदयोर्व्युत्पत्त्या अर्थं प्रकाशय। अनुमितेः किं करणम्? कश्च व्यापारः? कथञ्च व्यापारलक्षणं घटते? ॥

"यत्र यत्र धूमस्तत्र तत्राग्नि" रिति साहचर्यनियमो व्याप्तिः। व्याप्यस्य पर्वतादिवृत्तित्वं पक्षधर्मता।

ननु—का सा व्याप्तिः, यद्विशिष्टं पक्षधर्मताज्ञानं परामर्श इत्युक्तम् इत्याकाङ्क्षायां व्याप्तेर्लक्षणमाह—"यत्र यत्र" इति। "यत्र यत्र धूमः तत्र तत्र वह्निः" इति व्याप्तेरभिनयः। "साहचर्यनियमो व्याप्ति" रिति व्याप्तेर्लक्षणम्। नियतत्वं=व्यापकत्वं साध्यत्वमिति यावत्, साहचर्यं=सामानाधिकरण्यम्। सहचरतीति सहचरः तस्य भावः साहचर्यमिति व्युत्पत्तेः। तथाच—'व्यापक (साध्य) सामानाधिकरण्यं व्याप्ति' रिति व्याप्तेर्लक्षणं निष्पन्नम्। तथा हि—'पर्वतो वह्निमान्' इत्यस्मिन्ननुमानवाक्ये व्यापको वह्निः, तस्य साहचर्यं नाम सामानाधिकरण्यं धूमे वर्त्तते, धूमो हि नियमेन वह्निसहचरो भवति वह्निं विना धूमस्याभावात्। वह्निस्तु न धूमसहचरः तप्तायःपिण्डे धूमं विनापि

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

वह्निदर्शनात्, तस्मात् 'यत्र यत्र धूमः तत्र तत्र वह्नि'' रिति वह्नेरेव व्याप्तिर्धूमशिरसि, नतु एवं भवति 'यत्र यत्र वह्निः तत्र तत्र धूम' इति । नहि धूमो वह्नेर्व्यापकः अपितु वह्नेर्व्याप्यः । यस्य शिरसि साध्यस्य व्याप्तिस्तिष्ठति असौ 'व्याप्य' इत्युच्यते, अत एव व्याप्तिलापनकाले 'यत्र यत्र धूम' इति रीत्या पूर्वं धूम उच्यते, पश्चात् 'तत्र तत्र वह्नि' रिति वह्निरुच्यते । व्याप्तिलापनकाले व्याप्यस्य वचनं पूर्वं, व्यापकस्य च परं भवतीति नियमात् । उक्तञ्च भट्टपादैः—

'व्याप्यव्यापकभावो हि भावयोर्यादृगिष्यते ।
तयोरभावयोस्तस्माद्विपरीतः प्रतीयते ॥
अन्वये साधनं व्याप्यं साध्यं व्यापकमिष्यते ।
साध्याभावोऽन्यथा व्याप्यो व्यापकः साधनात्ययः ॥
व्याप्यस्य वचनं पूर्वं व्यापकस्य ततः परम् ।
एवं परीक्षिता व्याप्तिः स्फुटीभवति तत्त्वतः ॥' इति

व्याप्तिं निरूप्य 'पक्षधर्मतायाः' स्वरूपमाह 'व्याप्यस्ये' ति । व्याप्यस्य=व्याप्त्याश्रयभूतस्य (धूमादेरेव) यत् पर्वतादिवृत्तित्वम्=पर्वतादिपक्षनिष्ठत्वम् अर्थात् पर्वतादौ पक्षे वर्त्तमानत्वमाधेयत्वमिति यावत्, सैव 'पक्षधर्मता' इत्यर्थः । पक्षस्य धर्मः आधेयः पक्षधर्मः तस्य भावः पक्षधर्मता इति व्युत्पत्तेः ।

(प्रश्नाः)—व्याप्तेः किं लक्षणम् ? पक्षधर्मतालक्षणं लिख । तस्यार्थं च विवृणु ।

अनुमानं द्विविधम् । स्वार्थं परार्थं च । स्वार्थं स्वानुमितिहेतुः । तथाहि स्वयमेव भूयोभूयोदर्शनेन 'यत्र यत्र धूमस्तत्राग्नि' रिति महानसादौ व्याप्तिं गृहीत्वा पर्वतसमीपं गत्वा तद्गते चाग्नौ सन्दिहानः पर्वते धूमं पश्यन् व्याप्तिं स्मरति 'यत्र धूमस्तत्राग्नि' रिति । तदनन्तरं 'वह्निव्याप्यधूमवानयं पर्वत' इति ज्ञानमुत्पद्यते । अयमेव 'लिङ्गपरामर्श' इत्युच्यते । तस्मात् 'पर्वतो वह्निमानि' ति ज्ञानमनुमितिरुत्पद्यते । तदेतत्स्वार्थानुमानम् ।

अनुमानं विभजते—"अनुमान" मिति । स्वार्थानुमानं लक्षयति—"स्वानुमितिहेतु" रिति । स्वस्यार्थः प्रयोजनं यस्मात् तत्स्वार्थमिति, स्वार्थञ्च तद-

---

* अभिलाप आकार इति यावत् ।

† श्लोकवार्त्तिकग्रन्थ इति शेषः ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

नुमानं स्वार्थानुमानमिति समानाधिकरणसमासः। एवं—"स्वसमवेतानुमितिमात्रहेतुत्वं, किंवा न्यायाप्रयोज्यानुमानत्वं स्वार्थानुमानत्वम्" इति निर्गलितं लक्षणम्। एतत् उदाहरणेन स्पष्टीकरोति "तथा हि" इत्यादिना। स्वयमेव= अनुमितिज्ञानेच्छुकः पुरुषः भूयोभूयोदर्शनेन=पुनः पुनः वह्निधूमयोः साहचर्यदर्शनेन (समानदेशादिवृत्तित्वज्ञानेन) "यत्र यत्र" त्यादिरूपेण महानसादौ= रसवत्यादिस्थाने व्याप्तिं= उपर्युक्तलक्षणां साध्यसाधनयोः साहचर्यरूपां व्याप्तिं, गृहीत्वा=ज्ञात्वा पर्वतसमीपं गत्वा, तद्गते=पर्वतनिष्ठे * अग्नौ=वह्नौ सन्दिहानः="अत्र पर्वते वह्निरस्ति न वा" इति संशयं प्राप्तः सन् (यदा) † पर्वते धूमं पश्यन्=प्रत्यक्षं कुर्वाणः व्याप्तिं स्मरति="यत्र धूमस्तत्राग्नि" रित्याकारामुक्तरूपां व्याप्तिं "एकसम्बन्धिज्ञानमपरसम्बन्धिस्मारकम्" इति नियमेन चिन्तयति, तदनन्तरम्=स्मृतिरूपव्याप्तिज्ञानानन्तरम् (तस्य पुरुषस्य) "वह्निव्याप्यधूमवान् अयं पर्वतः" इति ज्ञानमुत्पद्यते, अयमेव अर्थात् उक्ताकारं ज्ञानमेव ‡ "लिङ्गपरामर्श" इत्युच्यते।

व्याप्तिबलेन लीनमर्थं गमयतीति लिङ्गम्=धूमादिः, तस्य परामर्शः= उक्ताकारो ज्ञानविशेषः लिङ्गपरामर्शः। तस्मात्—"वह्निव्याप्यधूमवानयं पर्वतः" इत्याकारकात् लिङ्गपरामर्शात् 'पर्वतो वह्निमान्' इति=इत्याकारकं यत् ज्ञानं तत् अनुमितिः=अनुमितिनामकं (व्याप्तिज्ञानरूपस्य करणस्य अनुमानस्य, परामर्शरूपस्य च व्यापारस्य फलभूतम्) ज्ञानमुत्पद्यते इति सरलोऽर्थः। 'तदेतत्' इति। तदेतत्=दर्शितमनुमानं स्वप्रतिपत्तिहेतुर्यस्मात्, तस्मात् 'स्वार्थानुमान' मित्युच्यते।

अत्र महानसादौ जायमानं धूमाग्न्योः साहचर्यरूपं ज्ञानं प्रथमम्। पश्चात् पर्वतादौ धूमदर्शनेन जायमानं स्मृतिरूपं व्याप्तिज्ञानं द्वितीयम्। ततः परामर्शनामकं ज्ञानं तृतीयम्। तस्मात् चतुर्थकक्षायां यत् "पर्वतो वह्निमान्" इत्याकारकं ज्ञानं जातं तदेवानुमितिरिति स्पष्टम्।

(प्रश्नाः)—अनुमानस्य विभागं ब्रूहि। स्वार्थानुमानस्य लक्षणं तत्प्रकारं च स्पष्टं लिख। प्रकृते 'लिङ्ग' पदस्य कोऽर्थः?

यत्तु स्वयं धूमादग्निमनुमाय परं प्रति बोधयितुं पञ्चा-

* "अग्नौ" वित्यत्र सप्तम्यर्थो विषयत्वम्। तथा च—"पर्वतवृत्तिवह्निविषयकसन्देहवान्" इत्यर्थः।

† "पर्वते" इत्यत्र सप्तम्यर्थो विशेष्यत्वम्। "धूमम्" इति द्वितीयार्थः प्रकारत्वम, "पश्यन्" इतिदृशिधात्वर्थः चाक्षुषप्रत्यक्षम्। तथा च—"पर्वतविशेष्यकधूमप्रकारकचाक्षुषप्रत्यक्षवान्" इत्यर्थः।

‡ लिङ्गपरा[illegible]नुमितिनिर्देशः।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

वयववाक्यं प्रयुङ्क्ते तत्परार्थानुमानम् । यथा (१) पर्वतो वह्निमान् (२) धूमवत्त्वात्, (३) योयो धूमवान्स स वह्निमान्, यथा महानसम् (४) तथा चायम्, (५) तस्मात्तथा इति । अनेन प्रतिपादिताल्लिङ्गात् परोऽप्यग्निं प्रतिपद्यते ॥

परार्थानुमानमाह—"यत्तु" इति । यच्छब्दस्य "यत्तदोर्नित्यसम्बन्धः" इति नियमेन तच्छब्देन अन्वयः, अर्थात् 'यत् पञ्चावयववाक्यं प्रयुज्यते तत् परार्थानुमानम्' इति सम्बन्धः "न्यायप्रयोज्यानुमानं" परार्थानुमानम् इति परार्थानुमानस्य लक्षणम् । पञ्चावयववाक्यमुदाहरति—'यथे' ति । 'पर्वत' इति । अत्र वह्निमतोऽभेदेन पर्वतेऽन्वयात् 'वह्निमदभिन्नः पर्वतः' इति प्रतिज्ञावाक्यबोधः । धूमवत्त्वादिति । अत्र पञ्चमी हेतौ । अतो धूमस्याधेयतासम्बन्धेन हेतुत्वेऽन्वये 'धूमनिष्ठं हेतुत्वम्' इति हेतुवाक्याद्बोधः । 'योयो' इति । अत्र वह्निपदस्य धूमव्यापकवह्निरिति लक्षणस्यार्थः । यत्तत्पदे च तात्पर्यग्राहके । तथा च 'योयो धूमवान् स स धूमव्यापकवह्निमान्' इति उदाहरणवाक्याद्बोधः । न्यायत्वं च "पञ्चावयववाक्यत्वम्" । पञ्च अवयवा यस्य वाक्यस्य इति व्युत्पत्त्या "प्रतिज्ञाद्यवयवपञ्चकसमुदायत्वं" न्यायलक्षणम् । 'तथाचाय' मिति—तच्छब्देन वह्निव्याप्यत्वबोधने थाल्प्रत्ययस्याश्रयत्वार्थकत्वे च अयं=पर्वतः तथा=वह्निव्याप्यधूमवान्" इत्युपनयवाक्याद्बोधः । "तस्मात्तथे" ति व्याप्तिपक्षधर्मताविशिष्टधूमः तत्पदार्थः । ज्ञानज्ञाप्यत्वं पञ्चम्यर्थः । तथा च "व्याप्तिपक्षधर्मताविशिष्टधूमज्ञानज्ञाप्यवह्निमान् पर्वतः" अर्थात् "वह्निव्याप्यधूमवत्त्वात् वह्निमान्" इति निगमनवाक्याद्बोधः । अनेन=पञ्चावयववाक्येन प्रतिपादितात्=व्याप्तिपक्षधर्मताबलेन बोधितात् लिङ्गात्=धूमादेः परोऽपि=अज्ञातवह्निरपि पुरुषः अग्निम्प्रतिपद्यते=पर्वतादौ वह्निमनुमिनोतीत्यर्थः ।

(प्रश्नाः)—परार्थानुमानस्य किं लक्षणम् ? किमुदाहरणम् ? न्यायस्य लक्षणं लिख्यताम् ।

प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि पञ्चावयवाः । "पर्वतो वह्निमान्" इति प्रतिज्ञा । "धूमवत्त्वात्" इति हेतुः । "यो यो धूमवान् स सोऽग्निमान् यथा महानसम्"

प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि पञ्चावयवा इति । अयम्भावः । परार्थानुमाने हि परस्याऽज्ञातेऽर्थे निश्चयः करणीय इत्युद्दिष्टम् । स च निश्चयः प्रत्यक्षानुमानोपमानशब्दरूपैश्चतुर्भिः प्रमाणैः कर्तुमिष्टः । तेन निश्चयस्य दार्ढ्यसम्भवात् तत्र 'पर्वतो वह्निमा'निति प्रतिज्ञा शाब्दम्प्रमाणमित्युच्यते ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

इत्युदाहरणम् । "तथा चायम्" इत्युपनयः । "तस्मात्तथा" इति निगमनम् ।

"पञ्चावयववाक्य" मित्युक्तं तत्र के ते अवयवा इति जिज्ञासायां तान्दर्शयति-'प्रतिज्ञे' ति । प्रतिज्ञाद्यन्यतमत्वमवयवत्वम् । साध्यविशिष्टपक्षबोधक-वचनं प्रतिज्ञा । यथा—पर्वतो वह्निमान् । तृतीयान्तं पञ्चम्यन्तं वा लिङ्गवचनं हेतुः । यथा—"धूमवत्त्वात्" इति । व्याप्तिप्रतिपादकदृष्टान्तवचनम्—उदाहरणम् । यथा—योयो धूमवान् स सोऽग्निमान् यथा महानसमिति । व्याप्ति-विशिष्टत्वेन हेतोः पक्षधर्मताप्रतिपादकवचनमुपनयः । यथा—"तथा चाय" मिति । पक्षे साध्यस्य अबाधितत्वप्रतिपादकवचनं निगमनम् । यथा—"तस्मात्तथे" ति इत्याशयेन "पर्वतो वह्निमान्" इत्यारभ्य "निगमन" मित्यन्तो मूलग्रन्थः ।

किञ्च—पक्षज्ञानं प्रतिज्ञायाः प्रयोजनम् । लिङ्गज्ञानं हेतुप्रयोजनम् । व्याप्तिज्ञानमुदाहरणप्रयोजनम् । पक्षधर्मताज्ञानमुपनयप्रयोजनम् । अबाधितत्वादिज्ञानं निगमनप्रयोजनम् इत्यवश्यंबोद्धव्यम् ।

(प्रश्नाः)—के पञ्चावयवाः ? प्रतिज्ञादीनां लक्षणं सोदाहरणं निरूप्यताम् । तेषां प्रयोजनानि च दर्शनीयानि ।

स्वार्थानुमितिपरार्थानुमित्योर्लिङ्गपरामर्श एव कारणम् । तस्माल्लिङ्गपरामर्शोऽनुमानम् ।

अनुमितिसामान्यस्य लक्षणमाह—'स्वार्थे' ति । पूर्वदर्शितयोर्द्वयोरप्य-नुमित्योः लिङ्गपरामर्शः=लिङ्गपरामर्शस्य कारणीभूतं यद्व्याप्तिज्ञानं तदेव करणम् । अनुमानमुपसंहरति—'तस्मादि' ति । तस्मात् लिङ्गपरामर्शः=लिङ्ग-

---

'धूमवत्त्वा' दिति हेतुवाक्यमनुमानमित्युच्यते । यो यो धूमवान्स स वह्निमान्, यथा महानसम्' । इत्युदाहरणवाक्येन प्रत्यक्षम्महानसादिकन्दृष्टान्त-रूपेणोपन्यस्यते, इति तृतीयमुदाहरणवाक्यम्प्रत्यक्षप्रमाणमित्युच्यते । 'तथा चाय' मिति चतुर्थमुपनयवाक्यमुपमितिरित्युच्यते । 'तस्मात्तथे'ति पञ्चमं निगमनवाक्यञ्चतुर्णामपि शब्दानुमानप्रत्यक्षोपमितिरूपप्रमाणानामुपसंहारस्था-नीयम्प्रयुज्यते । अत एवास्य निगमनमित्यन्वर्थकं नाम सङ्गच्छते, इति सङ्क्षेपः ।

किञ्च पक्षज्ञानम्प्रतिज्ञाप्रयोजनम् । लिङ्गज्ञानं हेतुप्रयोजनम् । व्याप्ति-ज्ञानमुदाहरणप्रयोजनम् । पक्षधर्मज्ञानमुपनयप्रयोजनम् । अबाधितत्वादि-ज्ञानं निगमनप्रयोजनम् । इत्यपि पञ्चावयवप्रयोजनम्बोध्यम् ।

लिङ्गपरामर्श एवेति । मीमांसका हि लिङ्गपरामर्शस्य कारणत्वे विवदन्ते । तन्मतखण्डनायाह —लिङ्गपरामर्श एवेति ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

परामर्शकारणीभूतव्याप्तिज्ञानमेवानुमानम् । तद्व्यापारस्तु परामर्श इति पूर्वमुक्तं न विस्मरणीयम् ।

केचित् "वह्निव्याप्यधूमवान् पर्वत" इत्याद्याकारकं परामर्शज्ञानमेवानुमितिकरणं मन्यन्ते । तेषां मते "फलायोगव्यवच्छिन्नं कारणं करणम्" अर्थात् यत्सत्त्वे अव्यवहितोत्तरक्षणे कार्यं जायते तदेव करणम्" इति करणलक्षणं बोध्यम् । केचित्तु—"ज्ञातं लिङ्ग" मेवानुमानमाहुः । अपरे पक्षे "लिङ्गज्ञान" मेवानुमानं मन्यन्ते । व्याप्तिस्मृतिं परामर्शञ्च मध्ये व्यापारमाहुः । केचित् स्मृतिरूपं व्याप्तिज्ञानमनुमानं, परामर्शञ्च व्यापारमाहुर्यथा मूल एवोक्तम् । सर्वेषां नैय्यायिकानां मते करणांशे विवादेऽपि परामर्शरूपव्यापारांशे केषाञ्चिदपि न विवादः । परामर्शं विना कोपि नैय्यायिकोऽनुमितिं न स्वीकरोतीति न्यायसिद्धान्तः ।

इदन्तु बोध्यम्—ज्ञायमानं लिङ्गमनुमितिकरणमिति प्राचां मतं, तन्न युक्तम् "इयं यज्ञशाला वह्निमत्यभूदतीतधूमात्" "इयं वह्निमती भविष्यति भाविधूमात्" इत्यादिस्थले ज्ञायमानं लिङ्गं नास्ति * तथाप्यनुमितिर्दृश्यते इत्यभिप्रायेणैव "लिङ्गपरामर्श एव करणम्" इति मूल उक्तम् ।

एवञ्चेदमेव "तृतीयं ज्ञान" मित्युच्यते तथाहि—महानसादौ धूमाग्न्योर्व्याप्तौ गृह्यमाणायां, यद्धूमज्ञानं तदादिमम् । पक्षे यद्धूमज्ञानं तद्द्वितीयम् । अत्रैव=परामर्श एव वह्निव्याप्यत्वेन यद्धूमज्ञानं तत्तृतीयम् । अयमेव "लिङ्गपरामर्श" इत्युच्यते । तदेव अनुमानं=अनुमितिकरणम् । यस्मिन्मते व्यापारवत्कारणं करणं तत्र तु—व्याप्तिज्ञानमेवानुमानम् लिङ्गपरमर्शो व्यापार इति ध्येयम् । तथैव चाधस्ताद्व्याख्यातम् । सर्वथा तु—

† "अनुमेयेन सम्बद्धम्प्रसिद्धञ्च तदन्विते ।
तदभावे च नास्त्येव तल्लिङ्गमनुमापकम्" ॥

इत्यवश्यमवधातव्यम् ।

(प्रश्नः)—अनुमितिकरणांशे मतभेदम्प्रदर्श्य प्राचां मतङ्खण्डय ?

लिङ्गन्त्रिविधम् । अन्वयव्यतिरेकि, केवलान्वयि, केवलव्यतिरेकि चेति । अन्वयेन व्यतिरेकेण च व्याप्तिमदन्वयव्यतिरेकि । यथा वह्नौ साध्ये धूमवत्त्वम् ।

---

* इदञ्च—'त्रिकालयुक्ता अर्था अनुमानेन गृह्यन्ते' इति भाष्यमूलकमेव ।

† 'अनुमेयेन सम्बद्धम्' इति कथनेन पक्षसत्त्वम्, 'प्रसिद्धञ्च तदन्विते' इत्यनेन सपक्षसत्त्वम्, 'तदभावे च नास्त्येव' इत्यनेन विपक्षाद्व्यावृत्तत्वम् इति लिङ्गधर्मत्रयमुक्तम्। एतदन्यतमेनोनं लिङ्गं लिङ्गाभास इति भावः ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

लिङ्गं विभजते—"लिङ्ग" मिति । अन्वयव्यतिरेकिणो लक्षणमाह—"अन्वयेने" ति । साध्यसाधनयोः साहचर्यमन्वयः, तदभावयोः साहचर्यं व्यतिरेकः । "अन्वयप्रयोज्यव्याप्तिमद्व्यतिरेकप्रयोज्याव्याप्तिमच्च यत् लिङ्गं=हेतुः "तदन्वयव्यतिरेकि" इति फलितम् । उदाहरति "यथे" ति । "धूमवत्त्वम्" इति—'यत्र यत्र धूमस्तत्र तत्र वह्नि" रित्यन्वयव्याप्तिः "यत्र यत्र वह्न्यभावः तत्र तत्र धूमाभाव" इति व्यतिरेकव्याप्तिरिति द्विविधव्याप्तिसत्त्वाद्धूमोऽन्वयव्यतिरेकिलिङ्गमिति भावः ।

केवलव्यतिरेकिण्यतिव्याप्तिवारणाय 'अन्वयेने' इत्युक्तम् । केवलान्वयिनि व्यभिचारवारणाय 'व्यतिरेकेण' इत्युक्तम् ।

(प्रश्नौः) कतिविधं लिङ्गम् ? अन्वयव्यतिरेकिणोर्लिङ्गस्य लक्षणं लिखित्वोदाहरणे योजय ।

यत्र धूमस्तत्राग्निर्यथा महानसमित्यन्वयव्याप्तिः । यत्र वह्निर्नास्ति तत्र धूमोपि नास्ति यथा महाह्रद इति व्यतिरेकव्याप्तिः ।

धूमवत्त्वहेतौ द्विविधां व्याप्तिमभिनीय दृष्टान्तद्वारा स्वयन्दर्शयति—"यत्र धूम" इति । स्पष्टम् ।

अन्वयमात्रव्याप्तिकङ्केवलान्वयि । यथा—घटोऽभिधेयः प्रमेयत्वात्पटवत् । अत्र प्रमेयत्वाभिधेयत्वयोर्व्यतिरेकव्याप्तिर्नास्ति, सर्वस्य प्रमेयत्वादभिधेयत्वाच्च । व्यतिरेकमात्रव्याप्तिकङ्केवलव्यतिरेकि । यथा पृथिवीतरेभ्यो भिद्यते

इति व्यतिरेकव्याप्तिरिति । अयम्भावः—अन्वयव्याप्तौ साध्यं व्यापकम्भवति । हेतुर्व्याप्यो भवति । व्यतिरेकव्याप्तौ तु तद्वैपरीत्यम् । तेन साध्याभावो व्याप्यः, साधनाभावो व्यापक इति पर्यवस्यति । तदुक्तम्—

व्याप्यव्यापकभावो हि भावयोर्यादृगिष्यते ।
तयोरभावयोस्तस्माद्विपरीतः प्रतीयते ॥१॥
अन्वये साधनं व्याप्यं साध्यं व्यापकमिष्यते ।
साध्याभावोऽन्यथा व्याप्यो व्यापकः साधनात्ययः ॥२॥

[अन्यथा व्यतिरेकव्याप्तावित्यर्थः । साधनात्ययः साधनाऽभाव इत्यर्थः]

'पृथिवी इतरेभ्यो भिद्यते इति । अत्रेतरपदेन जलादीन्यष्टद्रव्याणि, गुणादयः षट्पदार्थाश्च ग्राह्याः । तद्भेदश्च साध्यत्वेन विवक्षितः । स च

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

गन्धवत्त्वात् । यदितरेभ्यो न भिद्यते न तद्गन्धवत् । यथा जलम् । न चेयन्तथा । तस्मान्न तथेति । अत्र "यद्गन्धवत्तदितरभिन्नम्" इत्यन्वयदृष्टान्तो नास्ति पृथिवीमात्रस्य पक्षत्वात् ।

केवलान्वयिनो लिङ्गस्य लक्षणमाह—"अन्वयमात्रे" ति । भावयोर्व्याप्तिरन्वयव्याप्तिरिति पूर्वमुक्तम् । अन्वयमात्रेण व्याप्तिर्यस्मिन्तदन्वयव्याप्तिकम् । व्यतिरेकव्याप्तिशून्यत्वे सत्यन्वयव्याप्तिमत्त्वङ्केवलान्वयिनो लक्षणमित्यर्थः । उदाहरति—"यथे" ति । यत्र यत्र प्रमेयत्वं तत्र तत्राभिधेयत्वम्, यथा पटे । इति साध्यसाधनयोरेव व्याप्तिर्नतु तदभावयोरपि, तस्मात् 'अभिधेयत्व' साधनाय प्रयुक्तः "प्रमेयत्वं" हेतुः = लिङ्गं "केवलान्वयि" इत्युच्यते । प्रमेयत्वाभिधेयत्वयोः व्यतिरेकव्याप्तिं निषेधति—'अत्रे' ति । अभिधेयत्वसाधकानुमान इत्यर्थः । अत्रार्थेयुक्तिमाह—'सर्वस्ये' ति । पदार्थमात्रस्येत्यर्थः । सर्वे पदार्था अभिधेयाः प्रमेयाश्च सन्ति नत्वभिधेयत्वादीनाङ्कुत्राप्यत्यन्ताभावः, अत एवाभिधेयत्वाद्या धर्माः "केवलान्वयिन" इत्युच्यन्ते ।

केवलव्यतिरेकिणो लक्षणमाह—'व्यतिरेकमात्रे' ति । व्यतिरेकेण = अभावेनैव व्याप्तिर्यस्मिन्तत् "केवलव्यतिरेकि" । अन्वयव्याप्तिशून्यत्वे सति व्यतिरेकव्याप्तिमत्त्वं केवलव्यतिरेकिणो लक्षणमित्यर्थः । व्यतिरेकव्याप्तेर्लक्षणन्तु—साध्याभावव्यापकीभूताभावप्रतियोगित्वम् । "साध्याभावसाधनाभावयोः साहचर्यं व्यतिरेकव्याप्ति" रिति बालहितैषी पन्थाः । उदाहरति—'यथा "पृथिवी" ति—अत्र पृथिवीमात्रं (पृथिवीत्वावच्छिन्नं) पक्षः, पृथिवीतरजलाद्यष्टभेदः साध्यः, गन्धवत्वं हेतुः । "अत्र यद्गन्धवत्तदितरभेदवत्" इत्यन्वयदृष्टान्ताभावादन्वयव्याप्तिर्नास्ति । किन्तु—"यत्र यत्र पृथिवीतरजलाद्यष्टभेदाभावस्तत्र तत्र गन्धाभाव" इति व्यतिरेकव्याप्तिरेव । अत एव गन्धवत्त्वं व्यतिरेकिलिङ्गम् । दिङ्मात्रम्प्रादर्शि ।

अन्वयव्यतिरेकिणि व्यभिचारवारणाय "मात्र" पदम् । "नचेयन्तथे" ति—इयम्पृथिवी गन्धाभाववती न, किन्तु गन्धाभावाभावरूपगन्धवती । 'तस्मान्न तथे' ति—गन्धाभाववत्त्वाभावादितरभेदाभाववती न, किन्त्वितर (जलाद्यष्ट) भेदवतीत्यर्थः । अन्वयव्याप्तिशङ्काम्परिहर्तुमाह—अत्रेति । अत्र = इतरभेदसाधकानुमान इत्यर्थः ।

(प्रश्नाः)—केवलान्वयिनि लिङ्गस्य लक्षणं पदकृत्यञ्च लिख । तस्योदाहरणमपि दर्शय । "पृथिवी इतरेभ्यो भिद्यते गन्धवत्त्वात्" इति ग्रन्थं सुस्पष्टं व्याख्याहि ।

केवलम्पृथिव्यामेव सम्भवति, नान्यत्रेत्यन्वयिदृष्टान्ताभावात्केवलव्यतिरेकित्वमबोध्यम् ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

* सन्दिग्धसाध्यवान्पक्षः। यथा धूमवत्त्वे हेतौ पर्वतः। निश्चितसाध्यवान्सपक्षः। यथा तत्रैव महानसम्। निश्चितसाध्याभाववान्विपक्षः। यथा तत्रैव महाह्रदः।

"पृथिवीमात्रस्य पक्षत्वा" दित्युक्तम्, तत्र कः पक्ष इति शिष्यजिज्ञासायाम्पक्षस्य लक्षणमाह—"सन्दिग्धे" ति। सन्दिग्धं=संशयविषयीभूतं साध्यप्रकारकसन्देहविशेष्यत्वं † पक्षत्वम्, तद्वान्पक्ष इति फलितम्पक्षलक्षणम्। उदाहरति—'यथे' ति। पर्वते धूमंदृष्ट्वा 'अत्र वह्निरस्ति न वा' इत्याकारकः संशयो जायते, स च संशयः पर्वते प्रकारतारूपेण भासते। अतस्तादृशसंशयविषयः पर्वतो विशेष्यः। तस्मात्स एव पक्षः। सपक्षवारणाय "सन्दिग्धे" त्युक्तम्। (विशेष्यतासम्बन्धेन साध्यप्रकारकसंशयविशिष्टः पक्ष इति फलितम्)।

सपक्षस्य लक्षणमाह—'निश्चिते' ति। साध्यप्रकारकनिश्चयविशेष्यत्वं सपक्षत्वम्। उदाहरति–'यथेति'। स च निश्चयः 'महानसं वह्निमत्' इत्याकारकः। तद्विषयो महानसं 'सपक्ष' इत्युच्यते। पक्षेऽतिव्याप्तिनिरासाय 'निश्चिते' त्युक्तम् 'तत्रैवे' ति धूमवत्त्वे हेतावित्यर्थः। (विशेष्यतासम्बन्धेन साध्यप्रकारकनिश्चयविशिष्टः सपक्ष इति फलति)।

विपक्षस्य लक्षणमाह—"निश्चितसाध्याभावे" ति। साध्याभाव प्रकारकनिश्चयविशेष्यत्वं विपक्षत्वमित्यर्थः। उदाहरति—'यथा तत्रैवे' ति। स च निश्चयो "ह्रदो वह्न्यभाववान्" इत्याकारको महाह्रदं विषयीकरोति। अतोऽसौ विपक्ष इति भावः। सपक्षेऽतिव्याप्तिवारणाय "साध्याभाव" इति। पक्षेऽतिव्याप्तिवारणाय निश्चित' इति पदमुक्तम्। परमसारस्तु—यत्र साध्यस्य संशयः स पक्षः। यत्र साध्यस्य निश्चयः स सपक्षः। यत्र साध्यस्यात्यन्ताभावनिश्चयः स विपक्ष इति ज्ञेयः। (विशेष्यतासम्बन्धेन साध्याभावप्रकारकनिश्चयविशेष्यो विपक्ष इति निष्कृष्टिः)।

---

* उक्तञ्च तार्किकरक्षायाम्—

पक्षः साध्यान्वितो धर्मी साध्यजातीयधर्मवान्।
सपक्षोऽथ विपक्षस्तु साध्यधर्मनिवृत्तिमान्॥ इति।

† पक्षताविषये सिद्धान्तलक्षणे विशेषविचारोऽस्मदीयमुक्तावलीप्रभायामनुसन्धेयः।

सन्दिग्धसाध्यवान्पक्ष इति। वस्तुतस्तु प्रत्यक्षादिना साध्यनिश्चयसत्वेऽपि अनुमानेच्छायां सत्यामनुमितिर्भवति, अतःसिषाधयिषाविरहविशिष्टसिद्ध्यभावः पक्षता, तद्वान्पक्ष इत्येव पक्षतायाः सिद्धान्ते लक्षणम्बोध्यम्। एवं सत्येव 'प्रत्यक्ष... [illegible] तार्किकाः' इत्युद्घोषः सङ्गच्छते।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

सव्यभिचारविरुद्धसत्प्रतिपक्षासिद्धबाधिताः पञ्च हेत्वाभासाः । *सव्यभिचारोऽनैकान्तिकः । स त्रिविधः साधारणासाधारणानुपसंहारिभेदात् । तत्र–साध्याभाववद्वृत्तिः साधारणोऽनैकान्तिकः । यथा पर्वतो वह्निमान्प्रमेयत्वादिति प्रमेयत्वस्य वह्न्यभाववति (साध्याभाववति) ह्रदे विद्यमानत्वात् । सर्वसपक्षविपक्षव्यावृत्तः पक्षमात्रवृत्तिरसाधारणः । यथा शब्दो नित्यः शब्दत्वादिति । शब्दत्वं सर्वेभ्यो नित्येभ्योऽनित्येभ्यश्च व्यावृत्तं शब्दमात्रवृत्ति । अन्वयव्यतिरेकदृष्टान्तरहितोऽनुपसंहारी । यथा सर्वमनित्यं प्रमेयत्वादिति । अत्र सर्वस्यापि पक्षत्वाद्दृष्टान्तो नास्ति ।

सद्धेतवो निरूपिताः सम्प्रति प्रसङ्गात् असद्धेतून्=हेत्वा भासान्निरूपयितुं विभजते—"सव्यभिचारे" ति । हेतोराभासा "हेत्वाभासा" इत्यर्थः । हेत्वाभासपदं हेतुनिष्ठव्यभिचारादिदोषपरम् । हेतुवदाभासन्ते इति हेत्वाभासाः असद्धेतवो दुष्टहेतव इत्यर्थे तु हेत्वाभासपदन्दुष्टहेतुवाचकम् । अयम्भावः—यो

---

* "अनैकान्तिक" इति । एकान्ते साध्यवत्येव वर्त्तते इति ऐकान्तिकः । तदन्योऽनैकान्तिकः ।

हेत्वाभासान्लक्षयति–सव्यभिचारेत्यादि । सव्यभिचारोऽनैकान्तिक इति । एकान्तः, सिद्धान्तो, निश्चय इति पर्यायाः । एकान्तेन=अव्यभिचारेण चरतीत्यैकान्तिकः । 'चरति' इति सूत्रेण ठक्प्रत्ययः । 'ठस्येकः' इतीकादेशः । न ऐकान्तिकः अनैकान्तिकः । एवं रीत्याऽनैकान्तिकशब्दस्य सव्यभिचारपर्यायत्वम् । तत्र साधारणे साध्याऽभाववद्वृत्तित्वरूपव्यभिचारज्ञाने जाते साध्याऽभाववदवृत्तित्वरूपव्याप्तिज्ञानप्रतिबन्धः फलम् ।

असाधारणे तु सर्वसपक्षव्यावृत्तत्वान्निश्चितसाध्यवदवृत्तित्वे ज्ञाते तेनैव साध्यवदवृत्तित्वरूपसाध्यसामानाधिकरण्याभावे निश्चिते साध्यसामानाधिकरण्यरूपव्याप्तिज्ञानप्रतिबन्धः फलम् ।

अनुपसंहारिणि त्वन्वये व्यतिरेके वोभयत्र दृष्टान्ताभावादन्वयव्याप्तिज्ञानरूपा व्यतिरेकव्याप्तिज्ञानरूपा च सामग्री न सम्भवतीति व्याप्तिज्ञानानुत्पत्तिरेव फलम् ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

हि वस्तुतो हेतुर्न भवति किन्तु केवलम्पञ्चम्यादिविभक्तिसाम्याद्धेतुवदाभासते, यद्विषयकञ्ज्ञानं साक्षात्परम्परया वानुमितिम्प्रतिबध्नाति स हेतुवदाभासमानत्वात् "हेत्वाभास" इत्युच्यते। दोषाश्च व्यभिचार—विरोध—सत्प्रतिपक्षासिद्धि-बाधाः, एतद्विशिष्टा हेतवो दुष्टहेतवो भवन्तीत्यर्थः। हेत्वाभास सामान्यलक्षणन्तु—"अनुमितिप्रतिबन्धकयथार्थज्ञानविषयत्वम्" इति। यथा * "ह्रदो वह्निमान्द्रव्यत्वात्" इति स्थापनाम्प्रति "ह्रदो वह्न्यभाववा" निति प्रत्यक्षरूपो बाधनिश्चयः प्रतिबन्धकः। तेन 'ह्रदो वह्निमान्' इत्याकाराऽनुमितिर्नेदिति। एवमुक्ताकाराऽनुमितिप्रतिबन्धकं यत् "ह्रदो न वह्निमान्" इत्याकारकं यथार्थज्ञानं, तद्विषयत्वात् अर्थात् "द्रव्यत्वात्" इत्ययं हेतुर्बाधदोषवान् इत्याकारकज्ञानविषयत्वात 'द्रव्यत्व' हेतुर्बाधितो हेत्वाभासः। अथवा "पर्वतो वह्निमान्प्रमेयत्वात्" इत्यनुमितिर्न भवति। प्रमेयत्वस्य तादृशानुमितिप्रतिबन्धकव्यभिचारज्ञानविषयत्वात्=व्यभिचारदोषदुष्टत्वात् अर्थात् "प्रमेयत्वं हेतुर्व्यभिचारी" इत्याकारकयथार्थज्ञानविषयत्वादस्य हेत्वाभासता अनया दिशा सर्वत्रोह्यम्।

हेतौ व्यभिचारादिदोषज्ञाने सत्यनुमितिप्रतिबन्धो व्याप्तिज्ञानप्रतिबन्धो वा जायते। तेन समान्यलक्षणेऽनुमितिपदमनुमितितत्करणान्यतरपरम्बोध्यम्। अधिकन्तु—मत्प्रणीतन्यायमुक्तावलीप्रभायान्द्रष्टव्यम्। इह बालानाङ्काठिन्यम्मत्वोपेक्षितम्।

सव्यभिचारं लक्षयति—'सव्यभिचार' इति। अनैकान्तिकः=एकस्मिन्पक्षे अन्तो निश्चयो यस्य स एकान्तः अव्यभिचारी, एकान्त एव ऐकान्तिकः 'विनयादिभ्यष्टक्' (पा० ५। ४। ३४) इति सूत्रेण स्वार्थे ठक्। न ऐकान्तिकोऽनैकान्तिकः। अनैकान्तिकः सव्यभिचारः। सव्यभिचारं विभजते—"स त्रिविध" इति। "तत्र"=साधारणादित्रयमध्ये इत्यर्थः। साधारणं लक्षयति—"साध्ये" ति। साध्याभावोऽस्यास्तीति साध्याभाववान्, साध्याभाववद्वृत्तिः। एवंभूतो हेतुः साधारणानैकान्तिको हेत्वाभासः। यो हेतुः सपक्षे विपक्षे च वर्त्तते असौ "साधारण" इति फलितम्। उदाहरति—"यथा" इति। प्रमेयत्वं हेतुः सपक्षे महानसादौ विपक्षे ह्रदादौ चापि वर्त्तमानत्वात्साधारणः। अस्य व्यभिचारज्ञाने जाते सति अर्थात् "वन्ह्यभाववद्वृत्ति प्रमेयत्वम्" इत्याकारकव्यभिचारदोषज्ञाने "यत्र यत्र प्रमेयत्वं तत्र तत्र वह्नि" रित्याकारकव्याप्तिज्ञानप्रतिबन्धः फलम्।

---

* 'ह्रदो वह्निमान्द्रव्यत्वात्' इत्यनुमितिस्थले वह्न्यभाववद्ध्रदो **बाधः**। तद्वत्त्वञ्च द्रव्यत्वे हेतावेकज्ञानविषयत्वसम्बन्धेन बोध्यम्। एकज्ञानञ्च—"वह्न्यभाववद्ध्रदो द्रव्यत्वावच्छिन्न" इत्याकारकसमूहालम्बनात्मकमेवेत्यस्मद्गुरुचरणाः स्पष्टं

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

असाधारणं लक्षयति—'सर्वे' ति। सपक्षेभ्यो विपक्षेभ्यो व्यावृत्तो यो हेतुः केवलं पक्षे वर्त्तते सोऽसाधारण इत्यर्थः। उदाहरति—'यथा शब्द' इति। लक्षणमुदाहरणे घटयति—'शब्दत्व' मिति । नित्येभ्यः=आकाशादिभ्यः। अनित्येभ्यः=घटादिभ्यः। अत्र आकाशादिः सपक्षो घटादिर्विपक्ष इति बोध्यम्। एतस्य हेतोः साध्याऽसाहचर्ये निश्चिते साध्यसामानाधिकरण्यरूपव्याप्ति-ज्ञानप्रतिबन्धः फलम्।

* अनुपसंहारिणो लक्षणमाह—'अन्वयेति' । केवलान्वयिपक्षकोऽनुप-संहारीति फलितम्। उदाहरति—"सर्वम्" इति। लक्षणमुदाहरणे योजयति—"अत्रे" ति । दर्शितानुमान इत्यर्थः । अस्य बीजन्तु द्विविधदृष्टान्ताभावात् अन्वयव्याप्तिज्ञानाभावो व्यतिरेकव्याप्तिज्ञानाभावश्च अर्थात् प्रकृते "यत्र प्रमेयत्वं तत्रानित्यत्वम्" "यत्राऽनित्यत्वाभावः तत्र प्रमेयत्वाभावः" इति द्विविधव्याप्तिज्ञानाभावेन 'सर्वमनित्यम्" इत्याकारा अनुमितिर्नोदेति। एवमनुपसंहारी साक्षादनुमितिप्रतिबन्धक इति भावः।

पदकृत्यन्तु—केवलान्वयिन्यतिव्याप्तिनिरासाय "अन्वय इति। केवल-व्यतिरेकिण्यतिव्याप्तिवारणाय "व्यतिरेक" इति च ज्ञेयम्।

(प्रश्नाः)—कति हेत्वाभासाः ? हेत्वाभासस्य किं लक्षणम ? अनैकान्तिकस्य भेदान् सलक्षणान् सोदाहरणं लिख। अनैकान्तिकपदस्य कोऽर्थः ? किंच तस्य सामान्य-लक्षणम् ? फल च कीदृक् ?

साध्याभावव्याप्तो हेतुर्विरुद्धः । यथा शब्दो नित्यः कृतकत्वादिति । कृतकत्वं हि नित्यत्वाभावेनानित्यत्वेन व्याप्तम्। साध्याभावसाधकं हेत्वन्तरं यस्य स सत्प्रतिपक्षः। यथा शब्दो नित्यः श्रावणत्वाच्छब्दत्ववदिति, शब्दोऽनित्यः कार्यत्वाद्घटवदिति ।

---

* संशयोत्पत्तिक्षणे निश्चयवारणाय निश्चयम्प्रति संशयसामग्र्याः प्रतिबन्धकत्वमवश्यं वाच्यम्। प्रकृते सर्वत्र साध्यसन्देहसत्त्वे तत्पूर्वन्तत्सामग्र्याःसत्त्वेन साध्यनिश्चयस्य न कुत्रापि सम्भवः। तेन व्यापकसाध्यसामानाधिकरण्यप्रमेयत्वादिरूपव्याप्तिग्रहानुत्पत्तेर्न तत्रानुमितिरित्यनुपसंहारिणो हेत्वाभासत्वमित्याशयः।

विरुद्धं लक्षयति साध्याभावव्याप्त इति । साध्याभाव व्याप्तिरित्यस्य साध्याभाव–निरूपित–व्यतिरेकव्याप्तिरित्यर्थः। तथा च हेतोः साध्यव्यापकीभूताभावप्रतियोगित्वं विरुद्धत्वमिति फलितम्। तेन च पक्षविशेष्यकसाध्याभावव्याप्यहेतुप्रकारकज्ञानात् पक्षविशेष्यकसाध्यप्रकारकानुमितिप्रतिबन्धः

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

विरुद्धस्य लक्षणमाह—"साध्येभावे" ति । साध्याभावनिरूपितव्याप्त्याश्रयो हेतुर्विरुद्धो हेत्वाभासः, अर्थात् यो हेतुः साध्यसाधनाय प्रयुक्तः सन् यदि साध्याभावमेव साधयेत् तदासौ "विरुद्ध" इत्युच्यते । उदाहरति—"शब्द" इति । अत्र शब्दः पक्षः, नित्यत्वं साध्यम्, कृतकत्वं=कार्यत्वं हेतुः । लक्षणमुदाहरणे योजयति "कृतकत्वं हि" इत्यादिना । कृतकत्वं हेतुर्नित्यत्वसाधनायोक्तः तद्विरुद्धमनित्यत्वमेवसाधयितुं प्रवृत्तः । "यत् यत् कृतकं तत्तदनित्य" मितिव्याप्तेः । तस्मात् * नित्यत्वाभावरूपानित्यत्वव्याप्यत्वात् प्रकृते "कृतकत्वात्" इति विरुद्धो हेत्वाभासः । अस्य पक्षविशेष्यकसाध्यप्रकारकानुमितिप्रतिबन्धः फलम् । अर्थात् "अनित्यत्वव्याप्य कृतकत्ववानयं शब्द" इत्याकारकविरोधिपरामर्शज्ञानात् "नित्यः शब्दः" इत्याकारानुमितेः साक्षात्प्रतिबन्धः । सत्प्रतिपक्षे द्वौ हेतू, विरुद्धे तु एको हेतुः साध्याभावसाधक इत्यनयोर्भेदः ।

सत्प्रतिपक्षस्य लक्षणमाह—"साध्याभावसाधक" मिति । यस्य हेतोः साध्याभावसाधकम्=साध्याभावस्यानुपमाकं हेत्वन्तरम्=प्रतिपक्षो हेतुर्वर्त्तते स हेतुः 'सत्प्रतिपक्षः' इत्यर्थः । अस्यैव द्वितीयं नाम 'प्रकरणसम' इति । उदाहरति—'यथे' ति । श्रावणत्वहेतोः साध्यीभूतस्य नित्यत्वस्याभावसाधनाय विरोधि हेत्वन्तरम् 'कार्यत्वात्' इत्यस्ति, अतः प्रतिपक्षवत्त्वात् 'श्रावणत्वम्' इति हेतुः सत्प्रतिपक्षो हेत्वाभासः । अयं विरोधिज्ञानसामग्रीत्वेन साक्षादेवानुमितिविरोधी । अर्थात् "कार्यत्वव्याप्याऽनित्यत्ववानयं शब्द" इत्याकारकविरोधिपरामर्शज्ञाने सति "शब्दः नित्यः" इत्यनुमितिर्नेदिति ।

(प्रश्नाः)—विरुद्धस्य किं लक्षणम्? किञ्चोदाहरणम्? फलञ्च किमस्ति? विरुद्धसत्प्रतिपक्षयोः को विशेषः? सत्प्रतिपक्षं सोदाहरणं निरूपय ।

असिद्धस्त्रिविधः आश्रयासिद्धः, स्वरूपासिद्धो, व्याप्य-

---

* "कृतकत्वाभावो हि नित्यत्वव्यापक" इति साध्याभावग्रहसामग्रीत्वेन साक्षादनुमितिप्रतिबन्धकत्वमेवास्य दूषकताबीजम् । बीजबीजन्तु "तेन सम्बन्धेन तद्वत्ताबुद्धिम्प्रति तत्सम्बन्धावच्छिन्नप्रतियोगिताकतदभाववत्ताबुद्धेः प्रतिबन्धकत्व"मिति ध्येयम् ।

फलम् । एवं सत्प्रतिपक्षेऽपि पक्षविशेष्यक-साध्याभावव्याप्यहेत्वन्तरप्रकारकज्ञानात् पक्षविशेष्यकसाध्यप्रकारकानुमितिप्रतिबन्धः फलम् । इति बोध्यम् । विरुद्धे स एव हेतुरनुमितिप्रतिबन्धकज्ञानं जनयति । सत्प्रतिपक्षे तु हेत्वन्तरमनुमितिप्रतिबन्धकज्ञानं जनयतीति भेदः । तथाच सत्प्रतिपक्षापेक्षया विरुद्धहेतूपन्यासे प्रयोक्तुरत्यन्ताशक्तिः प्रकटिता भवतीति भावः ।

असिद्धस्त्रिविध इति । आश्रयासिद्ध इति । आश्रयः पक्षः तस्याऽसिद्धिः ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

स्वासिद्धश्चेति । आश्रयासिद्धो यथा गगनारविदं सुरभ्यरविन्दत्वात् सरोजारविन्दवत् । अत्र गगनारविन्दमाश्रयः स च नास्त्येव । स्वरूपासिद्धो यथा शब्दो गुणश्चाक्षुषत्वात् । अत्र चाक्षुषत्वं शब्दे नास्ति शब्दस्य श्रावणत्वात् ।

* असिद्धं विभजते—"असिद्ध" इति । "आश्रयासिद्धाद्यन्यतमत्वमसिद्धत्व" मित्यसिद्धलक्षणम् । पक्षे पक्षतावच्छेदकस्य = पक्षतानियासकधर्मस्य अभावः आश्रयासिद्धिर्दोषः तादृशदोषवत्त्वमाश्रयासिद्धत्वम । "आश्रयासिद्ध" मुदाहरति—'गगने' ति । अत्र हि गगनारविन्दं पक्षः । तत्र अरविन्दे (कमले) गगनीयत्वं पक्षतावच्छेदकधर्मो नास्ति । एवं पक्षतावच्छेदकाभाववत्पक्षकत्वात् प्रकृते "अरविन्दत्वात्" इति हेतुराश्रयासिद्धः †

पक्षे हेत्वभावः स्वरूपासिद्धिर्दोषः तद्वान् हेतुः स्वरूपासिद्धः । स्वरूपासिद्धमुदाहरति—"यथे" ति । अत्र शब्दरूपे पक्षे चाक्षुषत्वहेतोरभाव एव । अत्र युक्तिमाह—"शब्दस्येति" । तस्मात् 'चक्षुषत्वात्" इति हेतुः स्वरूपासिद्धः । हेत्वाभावविशिष्टपक्षज्ञानात् "गुणत्वव्याप्यचाक्षुषत्ववानयं शब्द" इति परामर्शप्रतिबन्धः फलम् ।

(प्रश्नाः)—असिद्धस्य लक्षणं भेदमुदाहरणञ्च निरूपय ।

सोपाधिको हेतुर्व्याप्यत्वासिद्धः । साध्यव्यापकत्वे सति साधनाव्यापकत्वमुपाधिः । साध्यसमानाधिकरणात्यन्ताभा-

---

* असिद्धः साध्यतुल्यत्वाद्धेतुः साध्यसमो भवेत् ।
व्याप्तस्य पक्षधर्मत्वप्रतीतिः सिद्धिरिष्यते ॥
असिद्धस्तदभावः स्यात्—इति **तार्किकरक्षा** ।

† आश्रयः पक्षः असिद्धो यस्य स **आश्रयासिद्धः** । उदाहरणं यथा वा "ईश्वरो न सर्वज्ञः कर्त्तृत्वा" दिति । अत्रेश्वररूपपक्षासिद्धौ धर्म्यसिद्धेः, तत्सिद्धौ धर्मिग्राहकमानबाधात्सन्दिग्धधर्मासिद्धेश्चोभयस्याश्रयासिद्धिरिति भावः ।

तथा च पक्षे पक्षतावच्छेदकाभाव—सत्वे विशेषणाभावाद्विशिष्टाभावोपपत्याऽऽश्रयासिद्धिः संपद्यते । अनया च पक्षतावच्छेदकावच्छिन्नपक्षविशेष्यकपरामर्श प्रतिबन्धः, एवं तद्विशेष्यकानुमितिप्रतिबन्धश्च क्रियते इति तदेव फलम् । स्वरूपासिद्ध इति । पक्षहेत्वोः संबन्धाऽभावः, एवं हेतौ हेतुतावच्छेदकाभावो वा स्वरूपासिद्धिः । अनया च परामर्शप्रतिबन्धः क्रियते इति तदेवैतद्धेत्वाभासस्य फलम् ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

वाप्रतियोगित्वं साध्यव्यापकत्वम् । साधनवन्निष्ठात्यन्ताभावप्रतियोगित्वं साधनाव्यापकत्वम् । पर्वतो धूमवान् वह्निमत्त्वादित्यत्र "आर्द्रेन्धनसंयोग" उपाधिः। तथाहि यत्र धूमस्तत्रार्द्रेन्धनसंयोग इति साध्यव्यापकता । यत्र वह्निस्तत्रार्द्रेन्धनसंयोगो नास्ति अयोगोलके आर्द्रेन्धनसंयोगाभावादिति साधनाव्यापकता । एवं साध्यव्यापकत्वे सति साधनाव्यापकत्वात् आर्द्रेन्धनसंयोग उपाधिः । सोपाधिकत्वाद्वह्निमत्त्वं व्याप्यत्वासिद्धम् ।

व्याप्यत्वासिद्धस्य लक्षणमाह—"सोपाधिक" इति । ननु—कोसावुपाधिः येन सह वर्त्तमानो हेतुर्व्याप्यत्वासिद्धो भवति इति शिष्यजिज्ञासायामाह—"साध्यव्यापकत्वे सति" इति । यो धर्मः साध्यस्य व्यापकः अर्थात्साध्यसमानाधिकरणो भवति, साधनस्य हेतोरव्यापकः अर्थात् यत्र यत्र हेतुर्भवति तत्र सर्वत्र नियमेन न वर्त्तते असौ धर्मः तत्र हेतावुपाधिरित्युच्यते । उपाधिलक्षणान्तर्गतं साध्यव्यापकत्वं लक्षयति—"साध्यसमाने" ति । साध्यसमानाधिकरणो योऽत्यन्ताभावः अर्थात् यस्मिन्नधिकरणे साध्यं वर्त्तते तत्रैव वर्त्तमानो योऽत्यन्ताभावः तस्याऽप्रतियोगित्वमेव साध्यव्यापकत्वम् । यथा "पर्वतो धूमवान् वह्ने" रिति स्थापनायां पर्वतः पक्षः, धूमः साध्यम्, वह्निर्हेतुः ।

व्याप्यत्वासिद्ध इति । उपाधिरिति । 'पर्वतो धूमवान् वह्निमत्वात्' अत्र हि आर्द्रेन्धनसंयोगे धूमव्यापकत्वं गृहीतं चेत्तेनैव तुल्यवित्तिवेद्यन्यायात् धूमे आर्द्रेन्धन-संयोगव्याप्यत्वं गृहीतं भवति । एवं वह्नेरव्यापकत्वमार्द्रेन्धनसंयोगे गृहीतं चेत्तेनैव वह्नावार्द्रेन्धनसंयोगाऽव्याप्यत्वं गृह्यते । तादृशाऽव्याप्यत्वमेव व्यभिचरितत्वम् । तथाचोपाधिव्यभिचरितत्वं साधने वह्नौ गृहीतं चेत्तेनैव उपाधिभूताऽऽर्द्रेन्धन-संयोग-व्याप्यधूमव्यभिचारित्वं (अव्याप्यत्वं) साधन-वह्नौ गृहीतं भवति। तत्र चानुमान-प्रकार एवं बोध्यः, यत्पूर्वानुमानस्थहेतुं वह्निं पक्षीकृत्य वह्निर्धूमव्यभिचारी धूमव्यापकार्द्रेन्धनसंयोगव्यभिचारित्वात् घटादिवत्, यो यत्साध्य-व्यापक-व्यभिचारी स सर्वोऽपि तत्साध्य-व्यभिचारी इति व्याप्तेः। एवं रीत्या प्रकृतानुमान हेतुभूते पक्षे साध्यव्यभिचारोत्थापकतया दूषकत्वमुपाधेः फलम् । तथाच धूमाभाववद्वृत्तित्वरूपे धूमव्यभिचारे गृहीते वह्नौ (हेतौ) धूमाऽ(साध्याऽ) भाववदवृत्तित्वरूप व्याप्तिज्ञान प्रतिबन्धः फलम् ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अस्मिन् हेतौ "आर्द्रेन्धनसंयोग" उपाधिः । सच नियमेन "यत्र यत्र धूमः तत्र तत्र आर्द्रेन्धनसंयोग" इति व्याप्त्या प्रकृते साध्यीभूतस्य धूमस्याधिकरणे पर्वतादौ वर्त्तते तत्रैव वर्त्तमानो यो घटाभावस्तस्य प्रतियोगित्वं घटे, अप्रतियोगित्वमार्द्रेन्धनसंयोगे विद्यते इत्येव तस्य * साध्यव्यापकत्वम् । साधनाव्यापकत्वं लक्षयति—"साधनवन्निष्ठे" ति । अस्यायमाशयः, प्रकृते साधनं वह्निः, साधनाधिकरणम्पर्वतादिकमिवायोगोलकमपि । तत्र वर्त्तमानो योऽत्यन्ताभाव आर्द्रेन्धनसंयोगात्यन्ताभावस्तस्य प्रतियोग्येवार्द्रेन्धनसयोग इत्येतदेव तस्मिन्साधनाव्यापकत्वम्बोध्यम् । इत्थञ्चोक्तोपाधिलक्षणसत्त्वादार्द्रेन्धनसंयोग उपाधिः । तद्विशिष्टो (तेन सह वर्त्तमानो) "वह्ने" रित्याकारको हेतुः सोपाधिकत्वाद्व्याप्यत्वासिद्धो हेत्वाभास इत्याशयवान् "पर्वतो धूमवा" नित्यादि ग्रन्थेनोपाधिलक्षणङ्घटयित्वा दर्शयति ।

"यावत्साधनदेशसवर्त्तमानो यावत्साध्यदेशवृत्तिर्धर्म उपाधि" रित्युपाधिलक्षणस्य सरलसारः । यथा—जपाकुसुमरक्तता स्फटिके भासते इत्युपाधिरसावुच्यते । एवमेव साध्योपाध्योर्धर्मभूता व्याप्तिः स्फटिकस्थानीये साधनाभिमते (वह्न्यादौ) चकास्तीत्यार्द्रेन्धनसंयोगादिरुपाधिरभिधीयते । यदाहुः—

एकसाध्याविनाभावे † मिथः सम्बन्धशून्ययोः ।
साध्याभावाविनाभावी स उपाधिर्यदत्ययः ॥

यस्य साध्याभावः प्रमाणान्तरेण निश्चितः, स बाधितः । यथा वह्निरनुष्णो द्रव्यत्वादिति । अत्रानुष्णत्वं साध्यम्, तदभाव उष्णत्वं स्पार्शनप्रत्यक्षेण गृह्यते इति बाधितत्वम् ।

बाधितस्य लक्षणमाह—"यस्ये" ति । यस्य=हेतोः साध्याभावः=साध्यस्याभावः प्रमाणान्तरेण प्रत्यक्षादिप्रमाणेन निश्चितः=प्रमितः स 'बाधित' इत्यर्थः । उदाहरति—"यथे" ति । लक्षणं लक्ष्ये योजयति 'अत्रानुष्णत्व' मिति ।

---

* धूमवत्यार्द्रेन्धनसंयोगस्यावश्यकत्वादिति भावः ।

† मिथः=परस्परं सम्बन्धशून्ययोः=साहचर्यहीनयोः साधनोपाध्योर्मध्ये एकस्य साधनस्य साध्याविनाभावे निरूप्यमाणे सति यदत्ययः यदभावः यस्य तादृशोपाधेरभावः साध्याभावाविनाभाव इति भट्टाचार्यवार्त्तिकयोजना ।

बाधित इति । प्रत्यक्षेण साध्यस्य बाधनिश्चये जाते साध्यानुमितिप्रतिबन्धः फलम् ।

इत्यनुमानपरिच्छेदः ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

गृह्यते=ज्ञायते अतो द्रव्यत्वहेतोर्बाधितत्वमित्यर्थः। तथा च * प्रत्यक्षप्रमाणेन वह्नावुष्णत्वनिश्चये सति 'वह्निरनुष्ण' इत्यनुमितिर्नोदेति। बाधस्य † ग्राह्याभावनिश्चयत्वेन साक्षादनुमितिप्रतिबन्धकत्वं प्रयोजनम्।

(प्रश्नः)—बाधितहेत्वाभासस्य लक्षणमुदाहरणञ्फलञ्च निरूप्यताम्।

इदमात्रावश्यकं साररूपेण सरलञ्ज्ञेयम्—ज्ञातेन पदार्थेन ज्ञातस्य पदार्थस्य यज्ज्ञानं साऽनुमितिः। यथा पर्वते धूमन्दृष्ट्वा तत्र वह्नेरपि यत्सत्त्वं निश्चीयते सैवानुमितिः। यथा वा मेघस्य गर्जनं श्रुत्वा गृहाभ्यन्तरस्थितस्यापि पुरुषस्य गगने मेघनिश्चयो जायते साप्यनुमितिः। सर्वत्राप्यनुमितिषु पक्षः, साध्यं, हेतुर्दृष्टान्त इति चतुष्टयस्य ज्ञानमत्यावश्यकम्। यत्र किञ्चिद्वस्तुजातं साधयितुमिच्छयाऽनुमीयतेऽसौ पक्षो भवति। यथा पर्वते वह्निं साधनेच्छायाञ्जातायां वह्निरनुमीयते इति पर्वतः पक्षः। यत्साधनेच्छाविषयो भवति तत्साध्यम्। यथा तत्रैव वह्निः साध्यमित्युच्यते। तस्यैव धूमलिङ्गेन सिषाधयिषाविषयत्वात्। सिषाधयिषा च साधयितुमिच्छा। यस्य ज्ञानं (व्याप्तिज्ञानं) साध्यस्यानुमितिमुत्पादयति स 'हेतु' रित्युच्यते, यथा धूमः। दृष्टेन धूमेन वह्नेरनुमितिज्ञानञ्जायते, अतः स हेतुः। अपि च हेतुः साधनमित्युच्यते। साध्यस्य व्याप्तिः साधनोपरि वर्त्तते, अतो हेतुः "साध्यव्याप्तिविशिष्ट" इति कथ्यते। एवञ्चानुमितिज्ञानात्पूर्वं "साध्यव्याप्तिविशिष्टो हेतुर्वर्त्तते" इति ज्ञानमत्यावश्यकम्। इदमेव च ज्ञानम्परामर्श इति नैय्यायिकानाम्परिभाषा। एवमनुमितौ व्याप्तिज्ञानङ्करणं परामर्शो व्यापारः, अनुमितिः फलम् इति सिद्धम्भवति। किञ्च 'यत्र यत्र हेतुस्तत्र तत्र साध्यम्' इत्यन्वयसाहचर्यमन्वयव्याप्तिः। "यत्र यत्र साध्याभावस्तत्र तत्र साधनाभाव" इति व्यतिरेकसाहचर्यं व्यतिरेकव्याप्तिरिति द्विविधा व्याप्तिरित्यनया रीत्याऽन्यदपि मूलाद्बोधनीयम्।

इति बालबोधिन्यामनुमानपरिच्छेदः।

उपमितिकरणमुपमानम्। सञ्ज्ञासञ्ज्ञिसम्बन्धज्ञानमुपमितिः। तत्करणं सादृश्यज्ञानम्। अतिदेशवाक्यार्थस्मरणमवान्तरव्यापारः। तथा हि—गवयशब्दवाच्यमजानन्कुतश्चिदारण्यकपुरुषात् "गोसदृशो गवय" इति श्रुत्वा वनङ्गतो

* त्वगिन्द्रियजन्यस्पार्शनप्रत्यक्षप्रमाणेन।

† साध्याभावनिश्चयत्वेनेत्यर्थः।

उपमितिकरणमुपमानमिति। अत्र नैय्यायिकमते उपमिति प्रमाणस्य फलं गवयादिपदस्य शक्तिग्रहः। अतएव उपमितिः शब्दप्रमाणात् प्राङ् निरूपिता। प्रत्यक्ष–अनुमान–उपमित्यन्यतमैः शक्तिग्रहे शब्दानां संजाते ततः

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

वाक्यार्थं स्मरन् गोसदृशपिण्डम्पश्यति, तदनन्तरम् "असौ गवयशब्दवाच्य" इत्युपमितिरुत्पद्यते ।

अवसरसङ्गत्योपमानस्य लक्षणमाह—"उपमितिकरण" मिति उपमितेर्यत्करणं तदुपमानम्प्रमाणमित्यर्थः। कुठारादौ छिदादिकरणेऽतिव्याप्तिवारणाय "मिति" रित्युक्तम्। प्रत्यक्षादावतिव्याप्तिनिरासाय 'उप' इति पदन्दत्तम्। उपमितेर्लक्षणमाह * "सञ्ज्ञा सञ्ज्ञीति"। सञ्ज्ञा=नाम, सञ्ज्ञी=नामी तयोर्यत्

* उक्तञ्चोदयनाचार्यैः

सम्बन्धस्य परिच्छेदः संज्ञायाः संज्ञिना सह ।
प्रत्यक्षादेरसाध्यत्वादुपमानफलं विदुः ॥ इति ।

शाब्दबोधरूपफलं प्रति तेषां प्रमाणत्वसंभवः। अतएव 'प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि'–१–१–३ इति गौतमसूत्रे उपमानस्य शब्दात्प्राक् पाठः। मीमांसकमते तु, उपमितेः फलं शक्तिग्रहो नास्ति, किन्तु 'सौर्यं चरुं निर्वपेद् ब्रह्मवर्चसकामः' इत्यादौ 'सौर्यम्' इतिपदेन एकदेवताकत्वम्, तद्धितेन देवतानिर्देशः, औषध (चरु) द्रव्यकत्वम्, इत्यादि साम्येन 'यदाग्नेयोऽष्टाकपालोऽमावास्यायां पौर्णमास्यां चाच्युतो भवति' इति विहित आग्नेययाग उपतिष्ठते। आग्नेययागस्य चेतिकर्तव्यता ब्राह्मणग्रन्थे स्पष्टमुक्ता, सौर्यस्य तु नोक्ता। तेन सौर्ययागस्येतिकर्तव्यताऽऽकाङ्क्षायाम् 'आग्नेयवत् सौर्यः कर्तव्यः' इत्याद्यतिदेशविशेषवाक्यकल्पनमुपमितिप्रमाणस्य फलं वदन्ति । अतएव मीमांसकमते शब्दस्य तृतीयप्रमाणत्वम्, उपमितेश्च चतुर्थ प्रमाणत्वमिति विशेष उपपद्यते, उपमित्यपेक्षया शब्दस्य प्रबलत्वेन पूर्वोपस्थितत्वात् । तदुक्तं श्लोकवार्तिके—

भिन्नाऽनुमानादुपमेयमुक्ता
सौर्यादिवाक्यैरसहापि दृष्टम् ।
सादृश्यतोऽग्न्यादियुतं कथं नु
प्रत्याययेदित्युपयुज्यते नः ॥
प्रतिनिधिरपि चैवं व्रीहिसादृश्ययोगात् ।
भवति तदपचारे यत्र नीवारजातौ ॥
तदपि फलमभीष्टं लक्षणस्योपमायाः ।
प्रतिकृतिरपि गौणैर्बाध्यते यत्र चान्यैः । उप० परि० ५२–५३

इत्युपमानपरिच्छेदः ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

सम्बन्धज्ञानं=वाच्यवाचकभावरूपसम्बन्धज्ञानं सोपमितिः। उपमानप्रमाणस्य फलमित्यर्थः। अनुमित्यादावतिव्याप्तिनिरासाय 'सम्बन्ध' इत्युक्तम्। संयोगादावतिव्याप्तिवारणाय 'सञ्ज्ञासञ्ज्ञि' इति पदं निवेशितम्। किन्तदुपमानमिति जिज्ञासायामाह 'सादृश्यज्ञान' मिति। उपमानलक्षणं शिष्यबुद्धौ स्पष्टीकर्त्तुमाह 'तथाहि' इति। एवञ्च—गोसादृश्यविशिष्टपिण्डज्ञानं करणम्। आदिदेशवाक्यार्थस्मरणं * व्यापारः। उपमितिः फलमित्यतिसङ्क्षेपः।

(प्रश्नाः)—उपमितेः किं लक्षणम ? तत्करणञ्च किम् ? सर्वं सोदाहरणं स्पष्टं लेख्यम्।

इति बालबोधिन्यामुपमानपरिच्छेदः।

आप्तवाक्यं शब्दः। आप्तस्तु यथार्थवक्ता। वाक्यं पदसमूहः। यथा गामानयेति। शक्तं पदम्। "अस्मात्पदादयमर्थो बोद्धव्य" इतीश्वरेच्छा सङ्केतः शक्तिः।

उपजीव्योपजीवकभावसङ्गत्या क्रमप्राप्तं शब्दं (प्रमाणं) लक्षयति—"आप्ते" ति। 'शब्द' इति। शब्दप्रमाणमित्यर्थः। भ्रान्तपुरुषस्य वाक्ये प्रतारकपुरुषस्य च वाक्येऽतिव्याप्तिवारणाय लक्षणे 'आप्त' इत्युक्तम्। आप्तस्य लक्षणमाह—'आप्तस्त्व' ति। यथाभूताबाधितार्थोपदेष्टा आप्त इत्याप्तलक्षणम्। साक्षात्करणमर्थस्याप्तिस्तया प्रवर्त्तते इत्याप्त इति न्यायभाष्योक्तिः। परहितकारी सत्यवक्ता आप्त इति तु सारः। वाक्यस्य लक्षणमाह—'वाक्यमि' ति। पदसमूहः=क्रियाकारकपदानां समूह इत्यर्थः। वाक्यमुदाहरति—'यथा' इति। 'गा' मिति कारकपदं 'आनय' क्रियापदम्। एवमन्यत्रापि बोध्यम्। उक्तञ्च भाष्ये—'पदसमूहो वाक्यमर्थपरिसमाप्तौ' इति। अत्रेदं बोध्यम्—पदज्ञानं करणम्। वृत्तिज्ञानसहकृतपदज्ञानजन्यपदार्थोपस्थितिर्व्यापारः। वाक्यार्थज्ञानं (शाब्दबोधः) फलम्। उक्तञ्च—

* 'सादृश्यादृष्टचिन्ताद्याः स्मृतिबीजस्य बोधकाः' इत्युक्तेः।

आप्तवाक्यं शब्द इति। अयं भावः शक्तिग्रहसहकृतस्य शब्दस्य यच्छ्रवणेन्द्रियेण ज्ञानं तत्तु प्रत्यक्षे (श्रावणे) ऽन्तर्भूतम्। तदनन्तरं या पदार्थोपस्थितिः सापि स्मरणेऽन्तर्भूता। एवं रीत्या द्वयोः स्मर्यमाणपदार्थयोः यः संबन्धो भेदरूपो वाऽभेदरूपो वा स एव वाक्यार्थपदेनोच्यते। तदुक्तं भट्टैः—

'संसर्गो वाऽप्यभेदो वा वाक्यार्थो विदुषां मतः' इति।

तादृश वाक्यार्थज्ञानरूपे फले जननीये शब्दः करणमित्युच्यते। पदनिष्ठवृत्तिज्ञानाधीनपदार्थोपस्थितिः शब्दरूपकरणस्य व्यापारः, तदुक्तं विश्वनाथ पञ्चाननेनाऽपि—

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

पदज्ञानन्तु करणं द्वारं तत्र पदार्थधीः ।
शाब्दबोधः फलं तत्र शक्तिधीः सहकारिणी ॥ इति

पदस्य लक्षणमाह—'शक्त' मिति * "निरूपकतासम्बन्धेन शक्तिविशिष्टं पदम् । शक्तिं लक्षयति—"अस्माद्" इति । अस्मात्=घटादिपदात् अयमर्थः=कम्बुग्रीवादिमत्त्वरूपः घटत्वादिरूपोवाऽर्थः बोद्धव्यः=ज्ञातव्यः इत्याकारो य ईश्वरेच्छारूपः सङ्केतः सैव शक्तिरिति नैयायिकमतमित्यर्थः । एवञ्च "अर्थस्मृत्यनुकूलपदार्थसम्बन्धत्वं शक्तित्व" मिति शक्तिलक्षणम् । अयमेव "वाच्यवाचकभावः सम्बन्ध" इत्युच्यते ।

इदमवधेयम्–शाब्दबोधहेतुभूतपदार्थोपस्थित्यनुकूलः पदपदार्थयोः सम्बन्धो वृत्तिः । एकपदार्थेऽपरपदार्थसंसर्गविषयकं ज्ञानं शाब्दबोधः । वृत्तिश्च द्विविधा । शक्तिर्लक्षणा चेति । † ईश्वरेच्छासंकेतरूपा शक्तिर्मूले दर्शिता । इयमेव मुख्या वृत्तिः अभिधा इति चोच्यते । लक्षणां सङ्क्षेपेण निरूपयामः–शक्यसम्बन्धो लक्षणा । सा द्विविधा शुद्धा गौणी च । सादृश्येतरसम्बन्धरूपा शुद्धा । सादृश्यसम्बन्धरूपा गौणी । आद्या यथा "गङ्गायां घोषः" इत्यत्र गङ्गापदस्य शक्यार्थः जलप्रवाहरूपः, तत्र घोषस्यान्वया ऽसम्भवात् गङ्गापादस्य तीरे लक्षणावृत्तिराश्रीयते । उक्तवाक्यात् "गङ्गातीरे घोष" इत्यत्र लक्षणाया शाब्दबोध इत्यर्थः जलप्रवाहस्य तीरे यः सम्बन्धः संयोगरूपः स एव शब्दे आरोपितः सन् लक्षणावृत्तिरित्युक्तं भवति । वृत्तिं विना कोपि शब्दः कमप्यर्थं बोधयितुं न समर्थः । इयं जहत्स्वार्था=जहल्लक्षणा इत्युच्यते । मुख्यार्थस्य सर्वथा परित्यक्त्वात्=बाधित्वात् । शक्यलक्ष्योभयसम्बन्धरूपा लक्षणा अजहत्स्वार्था=‡ अजहल्लक्षणा । यथा–"काकेभ्यो दधि रक्ष्यताम्" इत्यत्र 'काक' पदस्य दध्युपघातकत्वेन रूपेण सर्वेषां दध्युपघातकानां काकबिडालकुक्कुरादीनां शक्यलक्ष्याणां बोधो जायते । दध्युपघातकमात्रात् दधिरक्षायां वक्तुस्तात्पर्यात् । गौणी यथा—'सिंहो माणवकः' इत्यत्र सिंहपदस्य सिंहसादृश्यविशिष्टे लक्षणा ।

---

* शक्तिनिरूपकत्वमेव पदे शक्तत्वम् । विषयतासम्बन्धेन शक्त्याश्रयत्वमेवार्थे शक्यत्वम् ।

† सोयं भगवदिच्छारूपः सङ्केतः पदविशेष्यकः, अर्थविशेष्यको बोधविशेष्यकश्चेति शक्तिवादे स्पष्टं पण्डितैरुपवेदनीयञ्च ।

‡ शक्यतावच्छेदकपरित्यागेन व्यक्तिमात्रबोधप्रयोजिका जहदजहल्लक्षणा । यथा—"तत्त्वमसि" इत्यत्र सर्वज्ञत्वकिञ्चिज्ज्ञत्वपरित्यागेन व्यक्ति (ब्रह्मस्वरूप) मात्रबोधनात् जहदजहल्लक्षणा इति वेदान्तमतम् ।

'पदज्ञानं तु करणं द्वारं तत्र पदार्थधीः ।
शाब्दबोधः फलं तत्र शक्तिधीः सहकारिणी' ॥ इति । कारि०

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

"सिंहवृत्तिशौर्यक्रौर्यादिसादृश्यविशिष्टो माणवक" इति बोधः । लक्षणाबीजन्तु-तात्पर्यानुपपत्तिरेव । वक्तुरिच्छैव च तात्पर्यमित्यतिसङ्क्षेपः । व्यञ्जना तु न वृत्तिरिति नैयायिकानां मतम् ।

(प्रश्नाः)—'आप्तवाक्यं शब्दः' इत्यस्य कोऽर्थः ? आप्तस्य किं लक्षणम् ? पदवाक्ययोर्लक्षणं ब्रूहि । कतिविधा वृत्तिः ? तत्र शक्तेः किं लक्षणम् । लक्षणा च का ? तस्या भेदं सोदाहरणं निरूप्य लक्षणायां बीजं दर्शय । व्यञ्जनावृत्तिरस्ति न वा ?

आकाङ्क्षायोग्यतासन्निधिश्च वाक्यार्थज्ञानहेतुः । पदस्य पदान्तरव्यतिरेकप्रयुक्तान्वयाऽननुभावकत्वमाकाङ्क्षा । अर्थाऽबाधो योग्यता । पदानामविलम्बेनोच्चारणं सन्निधिः । आकाङ्क्षादिरहितं वाक्यमप्रमाणम् । यथा गौरश्वः पुरुषो हस्तीति न प्रमाणम्, आकाङ्क्षाविरहात् । अग्निना सिञ्चेदिति न प्रमाणं, योग्यताविरहात् । प्रहरे प्रहरेऽसहोच्चारितानि गामानयेत्यादिपदानि न प्रमाणं सन्निध्यभावात् ।

वाक्यार्थबोधे सहकारिकारणान्याह–'आकाङ्क्षे' त्यादिना । आकाङ्क्षाया लक्षणमाह—"पदस्ये" ति । पदस्य='गा' मित्यादिकारकपदस्य पदान्तरान्वयाननुभावकत्वम्=पदान्तरस्य तद्भिन्नस्य आनयनादिपदस्य यो व्यतिरेकोऽभावः तत्प्रयुक्तं यदन्वयाऽननुभावकत्वं वाक्यार्थबोधाऽजनकत्वं सैवाकाङ्क्षेत्यर्थः । शाब्दबोधजननाय या क्रियापदस्य कारकपदापेक्षा कारकपदस्य च क्रियापदापेक्षा सैवाकाङ्क्षा । नहि क्रियापदं विना कारकपदं, कारकपदं विना वा क्रियापदं शाब्दबोधं जनयितुमलमिति भावः । किंवा—उक्तवाक्यघटकीभूतं यद् गोपदं, तद् 'अम्' पदाभावे सति अन्वयबोधं जनयितुमसमर्थम् अम्पदे सत्येव गोपदमन्वयमनुभावयति, अतो गोपदस्य अम्पदेन सहाकाङ्क्षा ।

आकाङ्क्षा योग्यतेति । अयं भावः मीमांसकैः 'श्रुति लिङ्गवाक्य प्रकरण-स्थानसमाख्यानां समवाये'० जै० सू० ३–१–इत्यादि सूत्रे लिङ्गपदेन यदुच्यते, तदेवात्र योग्यतापदेन नैय्यायिकादिभिर्व्यवह्रियते ।

'सामर्थ्यं सर्वभावानां लिङ्गमित्यभिधीयते' । इति लिङ्गपदस्य विवरणात् ।

तथा पूर्वोक्तसूत्रे वाक्यपदेनोल्लिख्यमानोऽर्थो नैय्यायिकादिभिः आकाङ्क्षा-पदेनोच्यते । 'समभिव्याहारो वाक्यमिति' मैमांसकैः परिभाषणात् । "अर्थैकत्वादेकं वाक्यं साकाङ्क्षं चेद्विभागेस्यात्" जै० सू० इति एकवाक्यत्वलक्षण-बोधकसूत्रेण समभिव्याहारस्य आकाङ्क्षामूलकत्वबोधनाच्च । एतेन सन्निधिरपि व्याख्यातः । सन्निधिं विना समभिव्याहाररूप वाक्यत्वानुपपत्तेरिति संक्षेपः ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

असम्भववारणाय 'पदान्तरव्यतिरेकप्रयुक्त—' इति । तथैव 'पदान्तरेति' ज्ञेयम् । योग्यताया लक्षणमाह—* "अर्थाबाध" इति फलितं लक्षणम् । † आसत्तेर्लक्षणमाह—'पदाना' मिति । उक्तानि लक्षणानि व्यतिरेकमुखेन घटयति—"अकांक्षादिरहित" मित्यादिग्रन्थेन । 'अग्निने' ति—सेककरणत्वस्य जलादिधर्मस्य वह्नौ बाधनिश्चयान्न तादृशवाक्याच्छाब्दबोधः ।

असहोच्चारितानि=विलम्बेनोच्चारितानीत्यर्थः । स्पष्टमन्यत् । तात्पर्य ज्ञानमपि सर्वत्र शाब्दबोधे कारणम्बोध्यम्, यतः 'सैन्धव मानय' इत्युक्ते भोजनप्रकरणे लवणस्य, यात्रासमये अश्वस्य च नियमेन तत्त्वबोधः तात्पर्यज्ञानं विना न भवितुमर्हति, अतो बहुषु स्थलेष्वपेक्षितं तात्पर्यज्ञानं लाघवबलेन वाक्यार्थबोधमात्रम्प्रति कारणमित्यभ्युपगन्तव्यम् । तात्पर्य=नाम वक्तुरिच्छा । अत एव तात्पर्यज्ञाने सति लक्षणोपास्यते इत्याद्यन्यत्र विस्तारः ।

(प्रश्नः)—वाक्यार्थज्ञाने कानि सहकारिकारणानि ? तेषां लक्षणोदाहरणे स्पष्टीकुरु ।

वाक्यं द्विविधम् । वैदिकं लौकिकं च । वैदिकमीश्वरोक्तत्वात्सर्वमेव प्रमाणम् । लौकिकं त्वाप्तोक्तं प्रमाणम् । अन्यदप्रमाणम् । वाक्यार्थज्ञानं शाब्दज्ञानं, तत्करणं शब्दः ।

वाक्यं विभजते—'वाक्य' मिति । वैदिकम्='इषेत्वोर्जेत्वा' (यजु० मा० सं० १।१) "ग्रामकामो यजेत" इत्यादिवेदवाक्यमित्यर्थः । वैदिककथनेन वेदमूलकस्मृतीतिहासपुराणानामपि प्रमाणत्वेन ग्रहणम् । वेदविरुद्धस्मृत्यादि तु नैव प्रमाणम् इत्याशयेनाह—"वैदिकमीश्वरोक्तत्वात्" इति । प्रकरणमुपसंहरति—'वाक्यार्थज्ञानम्' इति । एकपदार्थेऽपरपदार्थसंसर्गविषयकं ज्ञानमित्यर्थः ।

शाब्दबोधस्यायं क्रमः—यथा "घटमानय" इति वाक्ये घटपदस्य घटत्वविशिष्टोऽर्थः । तस्य वृत्तितासम्बन्धेन अमर्थे कर्मत्वेऽन्वयः, आङ्पूर्वकनीधातोरानयनमर्थः, तत्र निरूपकतासम्बन्धेन कर्मत्वस्यान्वयः, आख्यातार्थश्च कृतिः, तत्र आनयनस्यानुकूलतासम्बन्धेन अन्वयः, कृतेश्च आश्रयतासम्बन्धेन पुरुषे (त्वम्पदार्थे) अन्वयः । तथाच—"घटवृत्तिकर्मतानिरूपितानयनानु-

---

* अर्थयोः अबाधः अर्थाबाधः । अबाधः असम्बन्धाभावः, सम्बन्ध इति यावत् । एवञ्च—अर्थयोः परस्परसम्बन्धो योग्यता, एकपदार्थेऽपरपदार्थसम्बन्धो योग्यतेति फलितम् । वर्त्तते हि—'गामानय' इत्यत्र अम्पदार्थकर्मत्वे गोपदार्थसम्बन्धः । किंवा—'जलेन सिञ्चति' इति जलपदार्थनिष्ठकरणतायां सेकक्रियायाः सम्बन्धः ।

† तथा च—गोपदनिष्ठं यद् अम्पदाऽव्यवहितत्वं तदेव गोपदे अम्पदसन्निधिरित्यर्थः । आसत्तिः सन्निधिरित्यनर्थान्तरम् ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

कूलकृतिमान् त्वम्पदार्थ" इति उक्तवाक्यस्य शाब्दबोधः। अत्रानुकूलत्वादि सर्वं संसर्गमर्यादालभ्यम्। प्रपञ्चस्तु—मञ्जभायां द्रष्टव्यः। ग्रन्थगौरवभया-द्बालबोधप्रतिबन्धकत्वाच्चेह नाधिकमुक्तम्।

(प्रश्नाः)—कतिविधं वाक्यम् ? वाक्यार्थज्ञानस्य किं करणम् ?

इति बालबोधिन्यां शब्दपरिच्छेदः।

अयथार्थानुभवस्त्रिविधः, संशयविपर्ययतर्कभेदात्। एकस्मिन्धर्मिणि विरुद्धनानाधर्मवैशिष्ट्यावगाहि ज्ञानं संशयः। यथा स्थाणुर्वा पुरुषो वेति। मिथ्याज्ञानं विपर्ययः। यथा शुक्ताविदं रजतमिति। व्याप्यारोपेण व्यापकारोपस्तर्कः। यथा यदि वह्निर्न स्यात्तर्हि धूमोपि न स्यादिति। स्मृतिरपि द्विविधा यथार्था अयथार्था च। प्रमाजन्या यथार्था। अप्रमाजन्या अयथार्था।

अयथार्थानुभवं विभजते—'अयथार्थे' ति। संशयस्य लक्षणमाह—'एके' ति। एकस्मिन् धर्मिणि=एकस्मिन् पुरोवर्तिनि पदार्थे विरुद्धाः=व्यधिकरणा ये नानाधर्माः स्थाणुत्वपुरुषत्वादयः तेषां वैशिष्ट्यम्=सम्बन्धः तदवगाहि=तद्विषयकं ज्ञानं संशय इत्यर्थः। उदाहरति—'यथे' ति।

अयं भावः—एकस्मिन्नेव विशेष्ये यत्र भावाभावौ विशेषणतया अवभासेते तज्ज्ञानं संशयः। यथा "भूतलं घटवद्वा न वा" इति। अत्र हि भूतले घटो घटाभावश्च विशेषणतया भासते इतीदं ज्ञानं संशयः। विपर्ययस्य लक्षणमाह—'मिथ्याज्ञान' मिति। तदभाववति तत्प्रकारज्ञानम् अयथार्थज्ञानमित्यर्थः। विपर्ययो भ्रमः विपरीतभावना इत्यनर्थान्तरम्। यथार्थज्ञानवारणाय 'मिथ्या' इति। उदाहरति-'यथा शुक्ताविति'। तर्कस्य लक्षणमाह 'व्याप्यारोपेणे' ति। व्याप्यस्य=वह्न्यभावादेः, आरोपेण आहार्यज्ञानेन व्यापकस्य=धूमाभावादेः य आरोपः=आपादनं स तर्क इत्यर्थः। उदाहरति—'यदी' ति। असम्भवदोषवारणाय 'व्याप्यारोप' इत्यादि। अयं तर्कः * प्रमाणानुग्राहकः। स्वप्नोपि मानसभ्रमान्तर्भूतः।

अयं भावः—व्याप्यस्य य आरोप आहार्यज्ञानम्। (बाधकालीनेच्छाजन्यम्) तेन आपाद्यो यो व्यापकस्यारोपः स 'तर्क' इत्यर्थः। यदि 'वह्निर्न स्यात्'

---

* यद्यपि तर्को मानसविपर्ययरूप एवेति अयथार्थज्ञानस्य त्रैविध्यकथनमयुक्तमाभाति तथापि प्रमाणेन प्रमायां जननीयायां प्रतिबन्धकविघटनद्वारोपयोगित्वाद् भेदेन सङ्कीर्तनम्। प्रपञ्चो मदीयमुक्तावलीप्रभायाम्।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

इत्यत्र वह्न्यभावरूपव्याप्यस्यारोपेण व्यापको धूमाभाव आरोप्यते । एतच्च अयोगोलके घटते एतादृशस्तर्कः विषयपरिशोधकः । व्यभिचारसंशयनिवर्त्तकस्तु—'धूमो यदि वह्निव्यभिचारी स्यात् वह्निजन्यो न स्यात्' इत्याकारकः । अत्र हि वह्निव्यभिचारित्वं वह्निजन्यत्वाभावव्याप्यमिति शम् ।

प्रश्नाः—अयथार्थानुभवः कतिविधः ? संशयादीनां लक्षणमुदाहरणञ्च स्पष्टीकुरु । स्मृतेरपि भेदं दर्शय ? ।

सर्वेषामनुकूलवेदनीयं सुखम् । प्रतिकूलवेदनीयं दुःखम् । इच्छा कामः । क्रोधो द्वेषः । कृतिः प्रयत्नः । विहितकर्मजन्यो धर्मः । निषिद्धकर्मजन्यस्त्वधर्मः । बुद्ध्यादयोऽष्टावात्ममात्रविशेषगुणाः । बुद्धीच्छाप्रयत्ना द्विविधाः । नित्या अनित्याश्च । नित्या ईश्वरस्य । अनित्या जीवस्य ।

सुखं लक्षयति—'सर्वेषामि' ति । इष्टत्वेन वेदनीयम् = ज्ञानविषयः सुखमित्यर्थः । धर्ममात्रासाधारणकारणो गुणः सुखम् । शत्रुदुःखेऽतिव्याप्तिवारणाय 'सर्वेषा' मित्युक्तम् । दुःखं लक्षयति—प्रतिकूलतये' ति । अधर्ममात्रासाधारणकारणो गुणो दुःख मिति निष्कृष्टं लक्षणम् । * इच्छामाह—'इच्छे' ति । इच्छात्वजातिमती इच्छा । सा द्विविधा । फलेच्छा उपायेच्छा च । फलं सुखादिकम्, उपायो यज्ञादिः । † द्वेषमाह 'क्रोध' इति । 'द्वेष्टि' इत्यनुभवसिद्धद्वेषत्वजातिमान् 'द्वेष' इति द्वेषलक्षणम् । प्रयत्नं निरूपयति—'कृतिरिति । प्रयत्नत्वजातिमान् 'प्रयत्नः' । स त्रिविधः, प्रवृत्तिनिवृत्तिजीवनयोनिभेदात् । इच्छाजन्यो गुणः प्रवृत्तिः । द्वेषजन्यो गुणो निवृत्तिः । जीवनादृष्टजन्यो गुणो जीवनयोनिः । अयं प्राणसञ्चारणकारणम् ।

धर्मस्य लक्षणमाह—'विहिते' ति । वेदविहितं यद्यागादिकर्म, तज्जन्यो गुणो धर्मः । अधर्मवारणाय 'वेदविहिते' ति । यागादिक्रियायामतिव्याप्तिवारणाय 'कर्मजन्य' इति कथितम् । अधर्मलक्षणमाह—'निषिद्धे' ति । वेदेन निषिद्धं यत्कर्म सुरापानादि, तज्जन्य गुणोऽधर्मः । धर्मवारणाय 'वेदनिषिद्ध' इति । एतौ धर्माधर्मौ "अदृष्टम्" इत्युच्यते । वासनात्मकसंस्कारविशेषजन्यौ च भवतः । 'बुद्ध्यादय' इति । बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्कारा इत्यर्थः ।

(प्रश्नाः)—सुखदुःखयोर्लक्षणं लिखित्वा तयोः पदकृत्यं दर्शय । धर्माधर्मयोः किं लक्षणम् ? बुद्ध्याद्यष्टानां गुणानां क आश्रयः ? कतिविधाश्च ते ? ।

---

* प्रवृत्तेः साक्षादनुकूलत्वमिच्छाया लक्षणम् ।

† निवृत्तेः साक्षादनुकूलत्वं द्वेषस्य लक्षणम् ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

संस्कारस्त्रिविधः वेगो भावना स्थितिस्थापकश्चेति । वेगः पृथिव्यादिचतुष्टयमनोवृत्तिः । अनुभवजन्या स्मृतिहेतुर्भावना । आत्ममात्रवृत्तिः । अन्यथाकृतस्य पुनस्तादवस्थ्यापादकः स्थितिस्थापकः । कटादिपृथिवीवृत्तिः । इति गुणाः ।

संस्कारं विभजते—"संस्कार" इति । सामान्यगुणात्मविशेषगुणोभयवृत्तिगुणत्वव्याप्यजातिमान् 'संस्कार' इति लक्षणम् । घटादावतिव्याप्तिवारणाय 'गुणत्वव्याप्ये' ति । संयोगादिवारणाय 'आत्मविशेषगुणोभयवृत्ति' इत्युक्तम् । ज्ञानादिवारणाय 'सामान्यगुण' इति बोध्यम् । संस्कारत्वजातिमान् 'संस्कार' इति सरलं लक्षणम् । 'वेग' इति । द्वितीयादिपतनासमवायिकारणं * 'वेग' इति वेगलक्षणम् । स च कश्चित्कारणगुणादुत्पद्यते कश्चित्तु कर्मणः ।

तस्याश्रयमाह—"पृथिव्यादी" ति । भावनाया लक्षणमाह–"अनुभवे" ति । आत्मादिवारणाय प्रथमदलम् । अनुभवध्वंसवारणाय द्वितीयदलम् । अस्या आश्रयमाह—"आत्मे" ति । स्थितिस्थापकस्य लक्षणमाह—"अन्यथे" ति । पृथिवीमात्रसमवेतसंस्कारत्वव्याप्यजातिमत्त्वं स्थिपिस्थापकत्वम् । गन्धत्वमादाय गन्धेऽतिव्याप्तिवारणाय 'संस्कारत्वव्याप्ये' ति । भावनात्वमादाय भावनायामतिव्याप्तिवारणाय 'पृथिवीमात्रसमवेते' ति । अस्याश्रयमाह—'कटादी' ति । इति गुणा' इति–द्रव्यकर्मभिन्नत्वे सति सामन्यवान् गुण इति गुणलक्षणं प्रागुक्तमत्रापिस्मरणीयम् ।

(प्रश्न)—संस्कारं सप्रपञ्चं निरूपय ।

इतिबालबोधिन्यां गुणनिरूपणम् ।

चलनात्मकं कर्म । ऊर्ध्वदेशसंयोगहेतुरुत्क्षेपणम् । अधोदेशसंयोगहेतुरपक्षेपणम् । शरीरस्य सन्निकृष्टसंयोगहेतुरा-

---

* क्रियाजन्यत्वे सति क्रियाजनकत्वं वेगलक्षणम् । गुरुत्वादिवारणाय सत्यन्तम्, विभागादिवारणाय विशेष्यदलमिति **वाक्यवृत्तिः ।**

स्थितिस्थापक इति । यथा वृक्षस्था शाखा हस्तादिनाऽऽकृष्यमाणाऽधो विलम्बिनी भवति । पुनः परित्यक्ता सा स्वस्थाने एव स्थिराभवति, नोपरि, नाप्यधः । एवंच वेगप्रशमनोत्तरं शाखादेर्यत्स्वस्थाने स्थिरत्वं जायते, तस्य कारणं स्थितिस्थापकः संस्कार इत्यर्थः ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

कुञ्चनम् । विप्रकृष्टसंयोगहेतुः प्रसारणम् । अन्यत्सर्वं गमनम् । पृथिव्यादिचतुष्टयमनोमात्रवृत्ति ।

कर्म निरूपयति—'चलनात्मकमि' ति । संयोगभिन्नत्वे सति संयोगासमवायिकारणम् 'कर्म' इति कर्मलक्षणम् । हस्तपुस्तकसंयोगेऽतिव्याप्तिवारणाय आद्यं दलम् । घटादावतिव्याप्तिवारणाय द्वितीयदलम् । उत्क्षेपणं लक्षयति—'ऊर्ध्वे' ति । अपक्षेपणे अतिव्याप्तिवारणाय 'ऊर्ध्वे' ति । कालादावतिव्याप्तिवारणाय लक्षणे 'असाधारण' पदमपि निवेश्यम् । अपक्षेपणं लक्षयति—'अधोदेश' इति । अस्य पदकृत्यप्रकारः पूर्ववत्स्वयमूहनीयः । आकुञ्चनं लक्षयति—'शरीरस्ये' ति । प्रसारणं लक्षयति 'विप्रकृष्टे' ति । भ्रमणादि सर्वं गमनेऽन्तर्भवतीत्याशयेनाह अन्यदिति । उक्तञ्च—

भ्रमणं रेचनं स्यन्दनोर्ध्वज्वलनमेव च ।
तिर्यग्गमनमप्यत्र गमनादेव लभ्यते ॥ इति

अस्याश्रयमाह—'पृथिव्यादी' ति ।

(प्रश्नाः)—कर्मणः किं लक्षणम् ? के च तस्य भेदाः ? भ्रमणादीनि कर्माणि कुतो नोक्तानि ? उत्क्षेपणलक्षणं दर्शयित्वा पदकृत्यं लिख । कर्मण आश्रयं ब्रूहि ?

इति बालबोधिन्यां कर्मनिरूपणम् ॥

नित्यमेकमनेकानुगतं सामान्यम् । द्रव्यगुणकर्मवृत्ति । तद् द्विविधं परापरभेदात् । परं सत्ता, अपरं जातिर्द्रव्यत्वादिः । नित्यद्रव्यवृत्तयो व्यावर्तका विशेषाः । नित्यः सम्बन्धः समवायः, अयुतसिद्धवृत्तिः । ययोर्द्वयोर्मध्य एकमपराश्रितमेवावतिष्ठते* तावयुतसिद्धौ, अवयवावयविनौ गुणगुणिनौ क्रियाक्रियावन्तौ जातिव्यक्ती विशेषनित्यद्रव्ये चेति ।

समवायस्य लक्षणमाह 'नित्य' मिति । नित्यत्वे सति अनेकसमवेतत्वं सामान्यस्य लक्षणमित्यर्थः । सामान्यं जातिरित्यनर्थान्तरम् । संयोगेऽतिव्याप्तिवारणाय 'नित्य' मिति । जलपरमाणुगतरूपेऽतिव्याप्तिवारणाय 'अनेके' ति समवेतविशेषणम् । अस्याश्रयमाह—'द्रव्ये' ति । सामान्यं विभजते—'तदि' ति । परसामान्यमाह—'सत्ते' ति । अपरसामान्यमाह—'अपर' मिति । अधिकदेशवृत्तित्वात्सत्तायाः परत्वम् । तदपेक्षया न्यूनदेशवृत्तित्वमपरत्वम् । द्रव्यत्वाद्यपेक्षया अधिकदेशवृत्तित्वात्सत्तायाः परत्वम् । तदपेक्षया न्यूनदेशवृत्तित्वात्

* तत्र आधेयाः समवायप्रतियोगिनः । आधाराः समवायानुयोगिन इति बोध्यम् ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

द्रव्यत्वादेरपरत्वं बोध्यम् । विशेषपदार्थं लक्षयति—'नित्यद्रव्ये' ति । घटत्वादिवारणाय 'नित्यद्रव्यवृत्तय' इति । आत्मत्वमनस्त्वयोरतिव्याप्तिवारणाय 'आत्मत्वमनस्त्वाभिन्नत्वे सति' इत्यधिकमपि विशेषलक्षणे निवेश्यम् । 'व्यावर्त्तका' इति । नित्यद्रव्याणां परस्परभेदसाधका इत्यर्थः । अयमत्राशयः—नैय्यायिकैः स्वीकृता ये पदार्थाः तेषु लोकाप्रसिद्धा अपि केचन केवलशास्त्रवासनयैव ज्ञातव्याः । यथा लोके घटस्य तद्वृत्तिघटत्वधर्मस्य भेदं तयोः सम्बन्धञ्च कोपि स्वानुभवेन न जानाति परं तार्किकाणां मते तदस्ति । एव मेव प्राकृतजनबुद्ध्यगोचरो विशेषनामा पदार्थोऽपि नैय्यायिकैरङ्गीकृतः । तत्रेयं तेषां युक्तिरस्ति—घटादिकार्यद्रव्याणां परस्परं भेदोऽवयवभेदेनैवानुमीयते, तच्च क्रमशोऽनुमीयमानः "एतत् द्व्यणुकं तस्मात् द्व्यणुकाद् भिद्यते एतत्परमाणुसमारब्धत्वात्" इत्यन्तमेवानुमीयते । परं परमाणुषु नित्यत्वादवयवान्तराभावात् तथा अनुमानं न भवितुमर्हति, नहि परमाणवः केनापि द्रव्येण समारब्धाः=जन्याः सन्ति, अस्ति च परमाणूनां भेदः । तस्माद् यः कश्चन तेषां भेदको धर्मविशेषः स एव "विशेष" इतिनामपदार्थः । सच सर्वनित्यद्रव्यवृत्तिः अनन्तश्च । नित्यद्रव्याणामसङ्ख्येयत्वात् । विशेषाणां परस्परं भेदः स्वत एव । सेयं कुसृष्टिर्नवीनैः शिष्यहितमिच्छद्भिर्न स्वीक्रियते इत्यन्यदेतत् ।

(प्रश्नाः)—सामान्यसमवायविशेषाणां लक्षणं लिख । समवायस्य आश्रयं ब्रूहि । विशेषपदार्थसाधने युक्तिं दर्शय ।

समवायस्य लक्षणमाह—'नित्य' इति । संयोगेऽतिव्याप्तिवारणाय 'नित्य' इति । आकाशादावतिव्याप्तिवारणाय 'सम्बन्ध' इति । मीमांसकाभिमतस्वरूपसम्बन्धेऽतिव्याप्तिवारणाय 'स्वरूपसम्बन्धभिन्नत्वे सति, नित्यसम्बन्धत्वं समवायत्व' मिति लक्षणं बोध्यम् । समवायस्य वृत्तितामाह—'अयुतसिद्धे' ति । अयुतसिद्धलक्षणमाह—'ययो' रिति । अयुतसिद्धलक्ष्यमाह—'यथे' ति । समवायसाधकमनुमानन्तु—'नीलो घटः, रूपी पटः" इति विशिष्टबुद्धिर्विशेषणविशेष्यसम्बन्धविषया विशिष्टबुद्धित्वात् दण्डी पुरुष इति विशिष्टबुद्धिवत्' इति बोध्यम् । अवयवावयविनाविति । द्रव्यसमवायिकारणमवयवः । जन्यद्रव्यमवयवि । विशिष्टप्रतीतिनियामकत्वं सम्बन्धत्वम् इति सम्बन्धसामान्यलक्षणम् ।

अनादिः सान्तः प्रागभावः । उत्पत्तेः पूर्वं कार्यस्य । सादिरनन्तः प्रध्वंसः । उत्पत्त्यनन्तरं कार्यस्य । त्रैकालिक-

---

अनादिः सान्त इति । त्रिविधो हि वस्तुनोऽन्तो भवति—कालकृतो, देशकृतो, वस्तुकृतश्चेति । तत्र तन्तुषु इदानीं पटो नास्ति किन्तु भविष्यति, अथवा ध्वस्तः । इति प्रतीतिद्वयगम्यः कालकृतो वस्तुनोऽभावः क्रमेण प्रागभावप्रध्वंसाभावपदाभ्यामुच्यते । आकाशे ज्ञानगुणो नास्ति (किन्त्वात्म-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

संसर्गावच्छिन्नप्रतियोगिताकोऽत्यन्ताभावः। यथा भूतले घटो नास्तीति। तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकोऽन्योन्याभावः। यथा घटः पटो न भवतीति। सर्वेषां पदार्थानां यथायथमुक्तेष्वन्तर्भावात् सप्तैव पदार्था इति सिद्धम्।

कणादन्यायमतयोर्बालव्युत्पत्तिसिद्धये।
अन्नम्भट्टेन विदुषा रचितस्तर्कसङ्ग्रहः॥

अभावपदार्थं सप्रपञ्चं निरूपयन् आदौ प्रागभावस्य लक्षणमाह—'अनादि' रिति अभावसामान्यलक्षणन्तु–प्रतियोगिज्ञानाधीनज्ञानविषयत्वसभावत्वमिति। यस्याभावः स तस्य 'प्रतियोगी' इत्युच्यते। यथा भूतले घटाभावः, तस्याभावस्य घटः प्रतियोगी। एवं पटाभावस्य पटः प्रतियोगी इत्याद्यूह्यम्। तत्र 'अनादिः सान्त' इति प्रागभावलक्षणम्। घटादावतिव्याप्तिवारणाय 'अनादि' रिति। आकाशादावतिव्याप्तिवारणाय 'सान्त' इति चोक्तम्। प्रागभावस्य कालं दर्शयति—'उत्पत्ते' रिति। कार्यस्योत्पत्तेः प्राक् स्वप्रतियोगिसमवायिकारणे वर्त्तते इत्यर्थः। 'इह तन्तुषु पटो भविष्यति' इति प्रागभावस्याकारः। प्रध्वंसाभावस्य लक्षणमाह—'सादि' रिति। 'उत्पत्त्यनन्तरमिति'—कार्यस्योत्पत्त्यनन्तरं स्वप्रतियोगिसमवायिकारणवृत्तिः इति। सच 'घटो ध्वस्त' इत्याकारकप्रतीतिविषयः। घटादावतिव्याप्तिवारणाय 'अनन्त' इति। आकाशादावतिव्याप्तिवारणाय "सादि" रिति चोक्तम्॥

अत्यन्ताभावं लक्षयति—"त्रैकालिक" इति। नित्यसंसर्गाभावत्वमत्यन्ताभावत्वमिति बालानां कृते सरलं लक्षणम्। तस्य प्रतीतिं दर्शयति 'यथा भूतले' इति। यथा वा 'वायौ रूपं नास्ति' इति वायौ कालत्रयेऽपि रूपाभावात् अत्यन्ताभावः। अन्योन्याभावस्य लक्षणमाह—'तादात्म्ये' ति *। प्रागभावप्रध्वंसयोरतिव्याप्तिवारणाय 'तादात्म्ये' त्युक्तम्। अन्योन्याभावस्य प्रतीतिं दर्श-

---

* तादात्म्यम् अवच्छेदकसम्बन्धः। तदवच्छिन्नप्रतियोगिताको योऽभावः सोऽन्योन्याभावः। घटे हि पटतादात्म्यं नास्ति, किन्तु तादात्म्यसम्बन्धावच्छिन्न-

---

न्यास्त)। वायौ रूपं नास्ति किंतु पृथिव्यादावस्ति इत्याकारको देशकृतो वस्तुनोऽभावोऽत्यन्ताभाव इत्युच्यते। तथा घटः पटो न इत्याद्याकारकः एकस्य वस्तुनोऽपरवस्तुकृतोऽन्तः अन्योन्याभाव इत्युच्यते। इति पूर्वमपि निरूपितं बोध्यम्।

इति लवपुरीयप्राच्यमहाविद्यालयप्रधानाध्यापक श्रीमन्महामहोपाध्याय भारडार्युपाह्व–माधवशास्त्रिभिर्लिखिता तर्कसङ्ग्रह टिप्पणी समाप्ता।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

यति—"घटः पटो न" इति । एवमेव 'गौरश्वो न' 'शुकः कपोतो न' इत्यादिप्रतीतिविषयो योऽभावः स एवान्योन्याभाव इत्युच्यते ।

ननु—प्रमाणप्रमेयाद्याः षोडशपदार्था गौतमेन महर्षिणा न्यायशास्त्रे प्रथिताः, तत् कथं सप्तैव पदार्था इत्याशङ्कायां स्वग्रन्थस्य न्यूनतां परिहरति—'सर्वेषा'मिति । एष्वेव सप्तसु पदार्थेषु इतरेषां पदार्थानामन्तर्भावः, तस्मान्न ग्रन्थस्य न्यूनतेति भावः । अन्तर्भावरीतिर्बृहद्ग्रन्थेषु वर्त्तते, प्रकृते बालानां काठिन्यं मत्वा न दर्शिता, परिचयमात्रन्तु प्रकाशितम् ।

इदन्तु बोध्यम्—पदार्थज्ञानस्य परमं प्रयोजनं मोक्षः । स च न्यायमते एकविंशतिदुःखध्वंसरूपः । एकविंशतिदुःखानि तु-शरीरम्, षट् इन्द्रियाणि, षट् विषयाः, षट् बुद्धयः, सुखम्, दुःखमिति ज्ञेयानि । यदा पदार्थानां तत्त्वज्ञानं भवति तदा देहादिषु आत्मत्वाभिमानरूपं मिथ्याज्ञानं नश्यति, तन्नाशे रागादिदोषाणां नाशः, तेन प्रवृत्त्यनुपपत्तिः, ततो जन्मापैति, जन्मापाये दुःखानि अपियन्ति । उक्तञ्च महर्षिणा—"दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः" इति । एवं पदार्थज्ञानं विना मोक्षो न जायत इति शिवम् ॥

चन्द्रवस्वङ्कचन्द्रेऽब्दे (१६८१) वैक्रमे धातृनामके ।
मधौ मासे दले शुक्ले मेषार्के शनिवासरे ॥१॥
पञ्चमे जार्जभूपेन्द्रे भारते सति शासति ।
नृसिंहेन मया विज्ञा न्यायशास्त्रप्रवेशिका ॥२॥
तर्कसङ्ग्रहटीकेयं पूरिता बालबोधिनी ।
उमाधवो माधवश्च तुष्येतां तेन कर्मणा ॥३॥

इतिश्रीपण्डितदेवीदासतनुजनुषा सारस्वतवंशावतंसेन सतीविष्णुदेवीगर्भजेन स्यालकोटवास्तव्य–जैनन्यायविशारद–कवितार्किक-दर्शनाचार्य-नृसिंहदेव-शास्त्रिणा विरचिता 'बालबोधिनी' नाम तर्कसङ्ग्रहटीका समाप्ता ।

॥ शिवोम् ॥

पटनिष्ठप्रतियोगितानिरूपपिताभाव एव वर्त्तते, स एवान्योन्याभावः । 'येन सम्बन्धेन यन्नास्ति' इत्युच्यते तन्निष्ठप्रतियोगितायां स सम्बन्धोऽवच्छेदकः । यथा 'भूतले संयोगेन घटो नास्ति' इत्युच्यमाने संयोगसम्बन्धावच्छिन्नघटनिष्ठप्रतियोगितानिरूपकाभावोऽस्ति इत्यर्थः, तादृशाभावीयप्रतियोगितायां संयोगसम्बन्धस्यावच्छेदकत्वात् । प्रकृते 'घटतादात्म्येन पटो नास्ति' इत्युच्यमाने तादात्म्यसम्बन्धावच्छिन्नपटनिष्ठप्रतियोगितानिरूपिताभावोस्तीत्यर्थः । तादृशाभावीयप्रतियोगितायां तु तादात्म्यसम्बन्धस्यावच्छेदकत्वादिति तादात्म्यसम्बन्धस्यावच्छेदकत्वम् ... इति शिवम् ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

ॐ

तर्कसंग्रह की भाषा टीका

विघनहरनपदकञ्जहृदय धरि मात शारदा ध्याइ।
भाषा करौं तर्कसंग्रह की सरल सुबोध बनाइ॥

द्रव्य, गुण, कर्म, सामान्य, विशेष, समवाय, अभाव—यह * सात पदार्थ है। पृथिवी, जल, तेज, वायु, आकाश, काल, दिशा, आत्मा, मन—यह नौ **द्रव्य** है।

रूप, रस, गन्ध, स्पर्श, सङ्ख्या, परिमाण, पृथक्त्व, संयोग, विभाग, परत्व, अपरत्व, गुरुत्व, द्रवत्व, स्नेह, शब्द, बुद्धि, सुख, दुःख, इच्छा, द्वेष, प्रयत्न, धर्म, अधर्म, संस्कार—यह चौबीस **गुण** हैं। उत्क्षेपण, अपक्षेपण, आकुञ्चन, प्रसारण, गमन यह पांच '**कर्म**' है। पर तथा अपर भेद से **सामान्य** दो प्रकार का है। सामान्य, सत्ता, जाति यह सामानार्थक जानने। † नित्यद्रव्यवृत्ति= नित्य द्रव्यों में रहनेवाले **विशेष** अनन्त हैं अर्थात् विशेष पदार्थ की संख्या का कोई अन्त नहीं। यह **स्वतोव्यावर्त्तक** होते हैं अर्थात् अपने भेद के साधक आपही हैं। नित्यपदार्थों का परस्पर भेद प्रतीत कराते हुए अपने भेद की प्रतीति के लिये किसी अन्य की अपेक्षा नहीं करते, यही विशेषों का विशेषपन है। नित्यसम्बन्ध को **समवाय** कहते हैं, और वह एक ही होता है। ‡ **अभाव** चार प्रकार का है। एक प्रागभाव, दूसरा प्रध्वंसाभाव, तीसरा अत्यन्ताभाव, चौथा अन्योन्याभाव। (इसका विशेष विचार ग्रन्थसमाप्ति पर किया जायगा)।

इति पदार्थोद्देशप्रकरणम्

---

* अर्थात् न न्यून संख्यावाले हैं न अधिक संख्यावाले हैं किन्तु सात ही हैं।

† पृथिवी, जल, तेज, वायु इन चारों के परमाणु, आकाश, काल, दिशा, आत्मा, मन—यह सब मिलकर नौ पदार्थ **नित्यद्रव्य** कहाते हैं।

‡ **राम** ने कृष्ण से कहा कि—तुम्हारी लेखनी कहा है, मुझे लिखने के लिये चाहिए। **कृष्ण** ने उत्तर दिया—मेरी लेखनी यहां नहीं है, सो '**नहीं है**' इस प्रकार नास्तिप्रतीत का विषय जो पदार्थ है उसको **अभाव** जानना चाहिये।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

यति—"घटः पटो न" इति । एवमेव 'गौरश्वो न' 'शुकः कपोतो न' इत्यादि-प्रतीतिविषयो योऽभावः स एवान्योन्याभाव इत्युच्यते ।

ननु—प्रमाणप्रमेयाद्याः षोडशपदार्था गौतमेन महर्षिणा न्यायशास्त्रे प्रथिताः, तत् कथं सप्तैव पदार्था इत्याशङ्कायां स्वग्रन्थस्य न्यूनतां परिहरति—'सर्वेषा'मिति । एष्वेव सप्तसु पदार्थेषु इतरेषां पदार्थानामन्तर्भावः, तस्मान्न ग्रन्थस्य न्यूनतेति भावः । अन्तर्भावरीतिर्बृहद्ग्रन्थेषु वर्त्तते, प्रकृते बालानां काठिन्यं मत्वा न दर्शिता, परिचयमात्रन्तु प्रकाशितम् ।

इदन्तु बोध्यम्—पदार्थज्ञानस्य परमं प्रयोजनं मोक्षः । स च न्यायमते एकविंशतिदुःखध्वंसरूपः । एकविंशतिदुःखानि तु-शरीरम्, षट् इन्द्रियाणि, षट् विषयाः, षट् बुद्धयः, सुखम्, दुःखमिति ज्ञेयानि । यदा पदार्थानां तत्त्व-ज्ञानं भवति तदा देहादिषु आत्मत्वाभिमानरूपं मिथ्याज्ञानं नश्यति, तन्नाशे रागादिदोषाणां नाशः, तेन प्रवृत्त्यनुपपत्तिः, ततो जन्मापैति, जन्मापाये दुःखानि अपियन्ति । उक्तञ्च महर्षिणा—"दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञाना-नामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः" इति । एवं पदार्थज्ञानं विना मोक्षो न जायत इति शिवम् ॥

चन्द्रवस्वङ्कचन्द्रेऽब्दे (१९८१) वैक्रमे धातृनामके ।
मधौ मासे दले शुक्ले मेषार्के शनिवासरे ॥१॥
पञ्चमे जार्जभूपेन्द्रे भारते सति शासति ।
नृसिंहेन मया विज्ञा न्यायशास्त्रप्रवेशिका ॥२॥
तर्कसङ्ग्रहटीकेयं पूरिता बालबोधिनी ।
उमाधवो माधवश्च तुष्येतां तेन कर्मणा ॥३॥

इतिश्रीपण्डितदेवीदासतनुजनुषा सारस्वतवंशावतंसेन सती-विष्णुदेवीगर्भजेन स्यालकोटवास्तव्य-जैनन्यायविशारद-कवितार्किक-दर्शनाचार्य-नृसिंहदेव-शास्त्रिणा विरचिता 'बालबोधिनी' नाम तर्कसङ्ग्रहटीका समाप्ता ।

॥ शिवोम् ॥

पटनिष्ठप्रतियोगितानिरूपपिताभाव एव वर्त्तते, स एवान्योन्याभावः । 'येन सम्ब-न्धेन यन्नास्ति' इत्युच्यते तन्निष्ठप्रतियोगितायां स सम्बन्धोऽवच्छेदकः । यथा 'भूतले संयोगेन घटो नास्ति' इत्युच्यमाने संयोगसम्बन्धावच्छिन्नघटनिष्ठप्रतियो-गितानिरूपकाभावोऽस्ति इत्यर्थः, तादृशाभावीयप्रतियोगितायां संयोगसम्बन्ध-स्यावच्छेदकत्वात् । प्रकृते 'घटतादात्म्येन पटो नास्ति' इत्युच्यमाने तादात्म्यसम्ब-न्धावच्छिन्नपटनिष्ठप्रतियोगितानिरूपिताभावोस्तीत्यर्थः । तादृशाभावीयप्रतियो-गितायां तु तादात्म्यसम्बन्धस्याऽवच्छेदकत्वमिति [illegible]ः इति शिवम् ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

ॐ

तर्कसंग्रह की भाषा टीका

विघनहरनपदकञ्जहृदय धरि मात शारदा ध्याइ।
भाषा करौं तर्कसंग्रह की सरल सुबोध बनाइ॥

द्रव्य, गुण, कर्म, सामान्य, विशेष, समवाय, अभाव—यह * सात पदार्थ हैं। पृथिवी, जल, तेज, वायु, आकाश, काल, दिशा, आत्मा, मन—यह नौ **द्रव्य** हैं।

रूप, रस, गन्ध, स्पर्श, सङ्ख्या, परिमाण, पृथक्त्व, संयोग, विभाग, परत्व, अपरत्व, गुरुत्व, द्रवत्व, स्नेह, शब्द, बुद्धि, सुख, दुःख, इच्छा, द्वेष, प्रयत्न, धर्म, अधर्म, संस्कार—यह चौबीस **गुण** हैं। उत्क्षेपण, अपक्षेपण, आकुञ्चन, प्रसारण, गमन यह पांच '**कर्म**' है। पर तथा अपर भेद से **सामान्य** दो प्रकार का है। सामान्य, सत्ता, जाति यह सामानार्थक जानने। † नित्यद्रव्यवृत्ति=नित्य द्रव्यों में रहनेवाले **विशेष** अनन्त हैं अर्थात् विशेष पदार्थ की संख्या का कोई अन्त नहीं। यह **स्वतोव्यावर्त्तक** होते हैं अर्थात् अपने भेद के साधक आपही हैं। नित्यपदार्थों का परस्पर भेद प्रतीत कराते हुए अपने भेद की प्रतीति के लिये किसी अन्य की अपेक्षा नहीं करते, यही विशेषों का विशेषपन है। नित्यसम्बन्ध को **समवाय** कहते हैं, और वह एक ही होता है। ‡ **अभाव** चार प्रकार का है। एक प्रागभाव, दूसरा प्रध्वंसाभाव, तीसरा अत्यन्ताभाव, चौथा अन्योन्याभाव। (इसका विशेष विचार ग्रन्थसमाप्ति पर किया जायगा)।

इति पदार्थोद्देशप्रकरणम्

---

* अर्थात् न न्यून संख्यावाले हैं न अधिक संख्यावाले हैं किन्तु सात ही हैं।

